वैणवं शैग्रवं चाथ जम्बूः स्त्री जम्बु जांबवम् ॥ २२ ॥
45 जात्यादयस्त्वलिङ्गास्स्युः पुष्पार्थे व्रीहयः फले ।
विदार्याद्यास्तु मूलेऽपि पाटला कुसुमे न ना ॥ २३ ॥

सप्तम्यन्तपदारम्भाः पर्याया इह कुत्र चित् ।
सप्तम्यन्तं च पुंलिङ्गं विज्ञेयं संशये सति ॥ २४ ॥
आम्रे कामाङ्गमाकन्दौ चूतो वेलोऽङ्गनाप्रियः ।
50 करको वलयश्चाथ श्रेष्ठेऽत्र सहकारकः ॥ २५ ॥
अथ श्यामलके लाला लवली लावली फला ।
केसरे वकुलो मद्यलालसस्सिंहकेसरः ॥ २६ ॥
द्राक्षाफलो गुडश्चाथ न्यग्रोधो बहुपाद्वटः ।
श्रीवृक्षे पिप्पलोऽश्वत्थः प्लक्षश्चलदलोऽगुलः ॥ २७ ॥
55 उदुम्बरे प्राणिफलो मशकी हेमदुग्धकः ।
प्लक्षस्तु पर्कटिजटिकलापिगिरिलक्ष्मणाः ॥ २८ ॥
पलाशे किंशुकः पर्णो वातपोथस्त्रिपर्णकः ।
आस्फोतो ब्रह्मवृक्षश्च हस्तिकर्णदले कृती ॥ २९ ॥
बिल्वे मालूरमङ्गल्यौ श्रीफलो गोहरीतकी ।
60 परिव्याधे बालभीरुर्भीरुबालोऽम्बुवेतसः ॥ ३० ॥
शीतेऽभ्रपुष्पो वानीरो वञ्जुलो वेतसो रथः ।
विदुले प्रिय आम्राते द्वौ पीतनकपीतनौ ॥ ३१ ॥
कपित्थे स्युर्दधिफलो दधित्थग्राहिमन्मथाः ।
हृद्यो दन्तशठः पुष्पफलोऽरिष्टे तु फेनिलः ॥ ३२ ॥
65 मातुलुंगे तु रुचको वराम्लः केसरी शठः ।
वीजपूरे मातुलुंगो लुंगस्सुफलपूरकौ ॥ ३३ ॥
देविकायां महाशल्का दूष्यांगी मधुकुक्कुटी ।
अथात्यम्ला मातुलुंगी पूतिपुष्पी वृकाम्लिका ॥ ३४ ॥
छागे तु करुणो लक्षो मल्लिकाकुसुमप्रियः ।
70 जम्बीरे जम्भको दन्तशठो जम्भीरजम्भलौ ॥ ३५ ॥

नागरंगे तु नारंगो नार्यंगस्तक्रवासनः ।
त्वग्गन्ध एलको योगी मुचुलिन्दे तु निम्नकः ॥ ३६ ॥
न्युब्जे कर्मफलो भव्यः कर्मरंगश्शठेश्वरौ ।
महीपतिर्दन्तशठः कर्ता नेता च कर्म च ॥ ३७ ॥
75 विकंकते ग्रन्थिलस्स्याद्व्याघ्रपाच्च मधुच्छदः ।
सर्जेऽश्वकर्णस्साले तु कार्ष्यकस्सस्यसंवरः ॥ ३८ ॥
पीतसाले गौरसर्जप्रियकासनपीवराः ।
रक्तपुष्पोऽप्यथो सिन्धुसर्जे बाणः खरोऽर्जुनः ॥ ३९ ॥
रोहिते रौहिषो रोही रक्तो रौहितकोऽपि च ।
80 स्त्रीप्रिये वञ्जुलोऽशोकः कंकेलिः कर्णपूरकः ॥ ४० ॥
हेमपुष्पोऽप्यथांकोले निचोलोऽकोढशोधनौ ।
रसाले वरणस्सेतुस्तिक्तशाकोऽश्मरीरिपुः ॥ ४१ ॥
दोषग्रहे तु कतको द्रावणस्त्रवणस्सरः ।
उह्लेखनीयो लक्ष्मीवांस्तेरस्तोयप्रसादनः ॥ ४२ ॥
85 राजादने फलाध्यक्षः प्रियकश्च मधुस्त्रवः ।
मधुपुष्पे मधुष्ठीलो वानप्रस्थो मधूकवत् ॥ ४३ ॥
गुडपुष्पोऽप्यद्रिजेऽस्मिन् गौरशाको मधूलकः ।
पारिभद्रस्य भेदे च मन्दारः पारिजातकः ॥ ४४ ॥
भूर्जपत्रे भुजो भूर्जो मृदुत्वक् चर्मिचर्मिकौ ।
90 पीलौ गुडफलस्त्रंसी श्यामश्चाथात्र शैलजे ॥ ४५ ॥
अक्षोडः कर्परालश्च नेमीये त्वतिमुक्तकः ।
चित्रकृत् तिमिशो नेमी वञ्जुलोऽथायुगच्छदे ॥ ४६ ॥
सप्तपर्णो विशालत्वक्छारदो विषमच्छदः ।
कोविदारे चमरिको रक्तपुष्पो युगच्छदः ॥ ४७ ॥

95 काञ्चनारोऽप्याग्वधे तु व्याघातश्चतुरंगुलः ।
आरग्वध आरेवतश्शम्याकः प्रग्रहोऽग्वधः ॥ ४८ ॥
कृतमालस्सुपर्णश्च मदने तु फणी रसः ।
पिण्डीतके मरुवक इक्ष्वाकुर्गालवामनौ ॥ ४९ ॥
विचुलः पिचुलो राढः कैडर्यो विषपुष्पकः ।
100 काकर्दश्छर्दनश्चीनो गरलः कण्टकीति च ॥ ५० ॥
कालस्कन्धे तिन्दुकोऽक्षी स्फूर्जकश्शितिसारकः ।
काकेन्दौ काकपीलुस्स्यात् कुलकः काकतिन्दुकः ॥ ५१ ॥
सिते लोध्रे महालोध्रश्शवरश्चाथ लोहिते ।
तिरीटो मार्जनश्चिल्वः कृष्णेऽस्मिन् लोध्रगालवौ ॥ ५२ ॥
105 गुग्गुलौ कालनिर्यासो देवधूपो महेश्वरः ।
श्रीमान् स्निग्धस्सर्वसहश्श्लेष्मी तिक्तः कटुर्लघुः ॥ ५३ ॥
कामः पुरो जटायुश्च कुंभोलूखलकं वरम् ।
रज्जुदाले नीचुदारः कच्छूदारो गृहद्रुमः ॥ ५४ ॥
गूढवृक्षश्श्लेष्मफलो विषघ्नो द्विजकुत्सितः ।
110 उद्दालो बहुवारो ना सेलुश्श्लेष्मातकी न षण् ॥ ५५ ॥
शोभाञ्जने तीक्ष्णगन्धश्शिग्रुः काक्षीवमोचकौ ।
उष्णो मुरुंगी रक्तेऽस्मिन् मधुशिग्रुस्सुभञ्जनः ॥ ५६ ॥
गृञ्जनस्स्वादुगन्धा च प्रियालुस्तु धनुः पटः ।
कार्ष्मर्यं गोपभद्रा स्यात् कार्ष्मरी कृष्णवृन्तिका ॥ ५७ ॥
115 श्रीपर्णी कुमुदा गृष्टिर्गम्भारी भद्रपर्णिका ।
कैडर्यं कट्फलः कुम्भी श्रीपर्णी कुमुदेति च ॥ ५८ ॥
सुपार्श्वे स्यात् कन्दरालो गर्दभाण्डः कपीतनः ।
ताम्रपाकी फलेपाकी प्लक्षको गन्धमुण्डकः ॥ ५९ ॥

कदम्बे पुलकी श्रीमान् प्रावृषेण्यो हलीमकः ।
120 महाकदम्बके नीपो धूर्नो धूर्तारदीपनी ॥ ६० ॥
वासन्ते स्यात् कुरवकस्तिलकः कुबको मधुः ।
शुक्लपुष्पः कुरवको मदनो धूर्तनागरी ॥ ६१ ॥
करञ्जे स्यान्नक्तमालः प्रकीर्यश्चिरिबिल्वकः ।
कालिंगे पूतिकरजः पूतिके कलिकारकः ॥ ६२ ॥
125 बालपत्रे तिक्तसारः खदिरो दन्तधावनः ।
सिते तु तस्मिन् कदरश्शल्यकश्च मरुन्नवः ॥ ६३ ॥
मरूद्भवे विट्खदिरोऽप्यरिमोऽप्यरिमेदकः ।
कण्टकी चाप्यथैरण्डे हस्तपर्णोऽप्यलम्बकः ॥ ६४ ॥
रुवुः पञ्चांगुलश्चञ्चुरामण्डस्तरुणोऽम्बुकः ।
130 गन्धर्वहस्तो रुवुको वातघ्नो व्याघ्रपुच्छकः ॥ ६५ ॥
प्रियके तु प्रियंग्वाख्या कारम्भा फलिनी फली ।
विष्वक्सेना बला वृन्ता गुन्द्रा गोवन्दिनी लता ॥ ६६ ॥
भावज्ञा सर्षपी स्त्र्याख्या वृत्ताङ्गी सुपमावनी ।
कन्या चापि कदम्बस्तु निचुलोऽम्बुज इज्जलः ॥ ६७ ॥
135 स्योनाके शोणकट्वांगौ दीर्घवृन्तः कुटन्नटः ।
मण्डूकपर्णः पत्त्रोर्णो भल्लूकश्शुकनासकः ॥ ६८ ॥
भूतपुष्पो नटो ढंक ऋक्षप्टुण्डुक आरलुः ।
तिलके पललः श्रीमान् सुगन्धो मुखमण्डनः ॥ ६९ ॥
कर्णपूरोऽल्पपुष्पश्च पुन्नागे सुरवल्लभः ।
140 किदिरे दीनकंबोजौ तद्भेदे सुरपर्णिका ॥ ७० ॥
पारिभद्रे द्रुकिलिमं देवदारु सुराह्वयम् ।
पूतिकाष्ठं भद्रदारु पीतदारु च दारु च ॥ ७१ ॥

वृक्षोत्पले कर्णिकारः परिव्याधोऽथ भण्डिले ।
कपीतनश्शिरीषश्च करके दाडिमी त्रयी ॥ ७२ ॥
145 कुटजे कुटचो वत्सश्शक्राख्यो गिरिमल्लिका ।
एतस्यैवास्त्रियाविन्द्रयवभद्रयवौ फले ॥ ७३ ॥
पनसे कण्टकिफलः पयोऽण्डो जघनेफलः ।
कर्कशी मधुबीजश्च सरले पूतिकाष्ठकम् ॥ ७४ ॥
निंबे पार्वतकैडर्यद्वेपिच्छर्दनमाथिकाः ।
150 रोमशः पिचुमन्दश्च लकुचे लिकुचो डहुः ॥ ७५ ॥
पिचुले झावुकश्शाके पृथुच्छदहलीमकौ ।
उन्मत्ते धूर्तधुत्तूरधुस्तूरकितवाश्शठः ॥ ७६ ॥
धुर्दूरः काञ्चनाह्वोऽथ त्रिपुरे मदमत्तकः ।
प्रेतालये तु तित्तीकश्शाखोटो गण्डमालहा ॥ ७७ ॥
155 कुसरे भीरुमार्जारकिंशुका इंगुदी न षण् ।
पिण्डारके तु पिण्डीकः कृष्णे त्वस्मिन् वलाहकः ॥ ७८ ॥
पुत्रजीवे त्वक्षफलो रुद्राक्षे तु महामुनिः ।
एकास्ये त्वत्र माभीदो द्विमुखे तु वरार्गलः ॥ ७९ ॥
चतुर्मुखे ब्रह्मसंज्ञः पंचवक्त्रे हराह्वयः ।
160 षण्मुखे तु गुहाख्योऽथ किंपाके काकमर्दकः ॥ ८० ॥
तिन्तृडीकेऽम्लिका चिञ्चा शुक्तिर्नारी कपिप्रिया ।
तिंत्रिणी चाप्यथो हेमपुष्पे चांपेयचंपकौ ॥ ८१ ॥
हरणश्शीतलः कांतः कमनीयः पचंपचः ।
हीने त्वंजिः कुंभफलश्चांपेयो नागकेसरः ॥ ८२ ॥
165 करमर्दे वशाश्चोलः कृष्णपाकफलैः पदैः ।
व्यस्तैस्समस्तैर्युग्मैश्च पुंसि पंचदशाभिधाः ॥ ८३ ॥

सुषेणो विघ्नकोऽप्यल्पफलेऽस्मिन् करमर्दिका ।
वन्दाके वृक्षको वन्दा जीवन्त्यपद्रोहिणी ॥ ८४ ॥
वृक्षादनी वृक्षरुहा सेव्यास्मिन् क्षीरवृक्षजे ।
170 तनुस्तुष्टो जयः कान्तः कुणिः कानुलको द्रुमः ॥ ८५ ॥
अग्निमन्थे हविर्मन्थोऽप्यरणिः पावको वशा ।
गणिकार्यप्यथो देवताडे वेणी खरागरी ॥ ८६ ॥
कालस्कंधे तमालोऽस्त्री तापिछे काकतुंडिका ।
बदर्यां कुवली कोलिः कूली क्रूरा तिर्गाटिका ॥ ८७ ॥
175 लताकोलौ तु खलुकी गिरिकोलौ तु सौरमा ।
हस्तिकोलौ महाघोण्टा गोपघोण्टा महाफला ॥ ८८ ॥
जलकोलौ तु संगाली नरकोलौ तु कर्कशी ।
सृगालकोलौ हिंस्राथ शमी सक्तुफला जया ॥ ८९ ॥
काचस्थाल्यां कुबेराक्षी कृष्णवृन्ता फलेरुहा ।
180 आमोघा पाटलिर्न स्त्री पूरण्यां शल्मलिर्न पग ॥ ९० ॥
काष्ठीला तूलिनी तूलफलाथ कूटशाल्मली ।
रोचनश्शिंशपायां तु तीक्ष्णभूमावमादनी ॥ ९१ ॥
कपिला पिच्छिला भस्मगर्भा मण्डलपत्रिका ।
जंब्वां त्रिसारा विरजा महाजंब्वां महाफला ॥ ९२ ॥
185 सुरसाथो राजजंब्वां सुफलस्सुरभिच्छदः ।
काकजंब्वां तु मेघाभश्शिवेष्टश्शीनपल्लवः ॥ ९३ ॥
जंबूटनीलजंबूटौ शफर्यां श्लक्ष्णपत्रकः ।
शिखीन्द्राश्मन्तकाम्लोटा धवे गौरधुरंधरौ ॥ ९४ ॥
भल्लातक्यां त्रिलिंगायामग्निमुख्यप्यरुष्करः ।
190 कंपिल्ले रोचनी गुण्डा रक्तांगश्चन्द्रकर्कशौ ॥ ९५ ॥

सल्लक्यां सुरभिर्हस्तिप्रिया हस्त्यशना ध्रुवा ।
वैजयन्त्यां तु तर्कारी नादेयी च जयन्त्यपि ॥ ९६ ॥
धातक्यामनलज्वाला सुभिक्षा धातृपुष्पिका ।
स्नुह्यां समन्तदुग्धा स्नुग्वज्रा नन्दासिपत्रिका ॥ ९७ ॥
195 सिहुण्डस्सिन्धुरप्यस्यां विपत्रायां त्रिकण्टकः ।
वज्री गण्डर्यथो घण्टारवायां शणपुष्पिका ॥ ९८ ॥
तुण्डिकेर्यां रवा शीरा केसरा बदराफला ।
कार्पास्यिकन्यत्र वन्यायां भारद्वाज्यपि कुष्ठनुत् ॥ ९९ ॥
विपर्ण्यां भञ्जिका भार्ङ्गी विष्टा ब्राह्मणयष्टिका ।
200 ब्रह्मदण्डी च पद्मा च सारपर्ण्यां स्थिरा ध्रुवा ॥ १०० ॥
कोकिलाक्षस्तु काण्डेक्षुरिक्षुरः क्षुरकः क्षुरः ।
वासके त्वाटरूषस्स्यात् सिंहास्यो वाजिदंतकः ॥ १०१ ॥
वाशा सिंही वैद्यमाता वार्ताक्यां दुष्प्रधर्षिणी ।
वार्तिंगनस्तु भण्डाकी वार्ताकुर्हिंगुलुस्त्रियाम् ॥ १०२ ॥
205 गोष्टवार्तिंगने त्वेळा परुका जलजंतुका ।
हस्तिवार्तिंगने त्विभ्या विशाला दद्रुनाशिनी ॥ १०३ ॥
बृहत्यां प्रसहा काली वार्ताकी हिंगुदी कुली ।
लतावृहत्यां सुस्निग्धा धन्या प्रसहनी लता ॥ १०४ ॥
निदिग्धिकायां संधानी महासन्धा गिरिप्रिया ।
210 कण्टकाल्यां परिक्रूरा कुल्या कुल्यस्पृशी वरा ॥ १०५ ॥
दुस्स्पर्शा राष्ट्रिका सिंही कण्टकाली निदिग्धिका ।
दण्डोत्पले सहा देवा तलपोटे प्रमेहनुत् ॥ १०६ ॥
हयपुच्छी तु कांबोजी माषपर्णी महासहा ।
मार्कवे भृंगराजस्स्यात् पर्पणस्तु श्वपामनः ॥ १०७ ॥

215 कालमेष्यां कृष्णफला वागूजी वसुवल्लिका ।
सोमवल्ली पूतिफली सोमराजिरवल्गुजः ॥ १०८ ॥
परित्राण्यां त्रायमाणा त्रायन्ती बलभद्रिका ।
रेवत्यां रामदूती स्याद्वारुणी नागदन्त्यपि ॥ १०९ ॥
श्रीफल्यां क्लीतकी नीली नीलकेशी महारसा ।
220 ग्रामीणा रञ्जनी तुत्था कारवाही च नीलिनी ॥ ११० ॥
फल्गुः काकोदुंबरिका बलयूर्जघनेफला ।
दास्यां षडश्रा शार्ङ्गेष्ठा काकजंघा विलोमिका ॥ १११ ॥
काकनासा तु काकांगी जीवनीया शिरोरुहा ।
तृड्घ्न्यां वयस्या काकोली काकमाची तु वायसी ॥ ११२ ॥
225 प्रत्यक्छ्रेण्यां सुतश्रेणी द्रवन्ती शंबरी वृषा ।
चित्रोपचित्रा न्यग्रोधी रण्डा मूषिकपर्ण्यपि ॥ ११३ ॥
देव्यां मूर्वा धनुश्रेणी गोकर्णी पीलुपर्णिका ।
मधूलिका तिक्तवल्का पीलुनी तेजनी स्रुवा ॥ ११४ ॥
प्रत्यक्पर्णी तु शिखरी किणिही खरमञ्जरी ।
230 अपामार्गश्शैखरिको धामार्गवमयूरकौ ॥ ११५ ॥
अजशृंग्यां विषाणी स्याद्गोजिह्वादार्विके समे ।
शंखिनी चोरपुष्पी स्यात् केशिनी चाप्यथो लघुः ॥ ११६ ॥
वर्षा लंकायिका स्पृक्का मरुन्माला लता मरुत् ।
कच्छूरके द्राविडकः काल्यको वेधमुख्यकः ॥ ११७ ॥
235 निर्गुण्ड्यामिन्द्रसुरसस्सिन्दुवारश्च सिन्दुकः ।
कुठेरके तु पर्णासो मालोर्जरकठिञ्जरौ ॥ ११८ ॥
सितेऽस्मिन् मञ्जरी तीक्ष्णस्तीक्ष्णगन्धोऽर्जकोऽत्र तु ।
सुगन्धौ श्वेतसुरसा भारती तुलसी शिवा ॥ ११९ ॥

अल्पपत्रस्तु जंबीरः फणिर्जकसमीरणौ ।
240 अस्मिन् सुगन्धौ सौवासो मञ्जरीकमयूरकौ ॥ १२० ॥
तीक्ष्णे तीक्ष्णार्जको गौरी भूतघ्नी देवदुंदुभिः ।
अल्पमात्रे तु वैकुण्ठो बिल्वगन्धो वचाच्छदः ॥ १२१ ॥
कालपर्ण्यां तु सुरभिः करालः कालमालकः ।
मालो ब्रह्मजटायां तु सलज्जं दानवांजनम् ॥ १२२ ॥
245 पुण्डरीकं दमनकं कान्तं दान्तं मुनिः पुमान् ।
विष्णुक्रान्ता तु सुमुखी गवसी स्यान्महारसा ॥ १२३ ॥
ऋषणी द्रोणिका छत्रा चक्षुष्या द्रोणपुष्पिका ।
सूर्यावर्ते पर्णिकायां मोरटा मूलपुष्पिका ॥ १२४ ॥
मुण्ड्यां मुण्डितिका मुण्डा श्रमणी श्रामणी बुधा ।
250 रोदन्यां कच्छुरानन्ता ताम्रमूला दुरालभा ॥ १२५ ॥
यासो यवासो दुस्स्पर्शो धन्वयासः कुनाशकः ।
वृश्चिकाल्यामुष्ट्रधूम्रपुच्छिका नागदन्तिका ॥ १२६ ॥
सर्पदंष्ट्र्यमरा काली विषघ्नी वृश्चिकच्छदा ।
वात्यपुष्प्यां बला वाट्या सम्मासा चान्नसंज्ञिका ॥ १२७ ॥
255 वाट्यालोऽतिबलायां तु पुष्पवीर्या जनी सहा ।
अश्वकन्दस्त्वश्वगन्धी तिक्ते तु कटुपर्पटौ ॥ १२८ ॥
ऋषभी त्वजहाव्यण्डा कण्डूरा प्रावृषायणी ।
कपिकच्छूश्शूकशिंबिरात्मगुप्ता च कच्छुरा ॥ १२९ ॥
अस्थिमांस्त्वस्थिसंघातोऽप्यस्थिसन्नहनोऽपि च ।
260 एकाष्ठीला पापचेली स्थापनी वनतिक्तिका ॥ १३० ॥
पाठांबष्ठा विद्धकर्णी प्राचीना श्रेयसी रसा ।
गुडूच्यां कुण्डली धीरा छन्ना च्छिन्नरुहा धरा ॥ १३१ ॥

वत्सादनी सोमवल्ली विशल्या चक्रलक्षणा ।
जीवन्ती खरुहा देवी विषघ्न्यमृतवल्लिका ॥ १३२ ॥
265 दीर्घवल्यां वेत्रवन्यौ कुरुवेत्रश्च भूरदः ।
गवाक्ष्यां किणिही जैत्री प्रत्यक्छ्रेण्यपराजिता ॥ १३३ ॥
विष्णुक्रान्ता परास्फोताश्वखुरी शीतलात्र तु ।
श्वेतायां चारिणी सूर्या गिरिकर्णी गवादिनी ॥ १३४ ॥
नीलायां तु महाश्वेता निष्क्रान्ता स्थूलपुष्पिका ।
270 जिंग्यां समंगा विकसा मंजिष्ठांजनवल्लिका ॥ १३५ ॥
पृश्निपर्ण्यां पृथक्पर्णी लांगूली पदपर्णिका ।
गुहा कलशिधावन्यौ दीर्घा सा चित्रपर्णिका ॥ १३६ ॥
सिंहपुच्छी फेरुविन्ना चित्रांघ्रिः क्रोष्टुमेखला ।
नागर्यां केशिका त्र्यश्रा त्रिपुटा त्रिपुटी त्रिवृत् ॥ १३७ ॥
275 रेचनी महती श्वासा माया कुठरुणात्र तु ।
कृष्णायां रोचनी श्यामा काला चित्रा सुषेण्यपि ॥ १३८ ॥
गोपा तु शारिवा भद्रा नागजिह्वा सुगन्धिका ।
ज्योतिष्मत्यां पीतरसा लगणा कटभींगुदी ॥ १३९ ॥
पारावतपदी पिण्या जीवन्ती स्फुटवल्कली ।
280 नागवल्ली तु तांबूली तथा तांबूलवल्लिका ॥ १४० ॥
क्षुरे तु कण्टकिफलस्त्रिगोभ्यां कण्टकः परः ।
गोक्षुरस्स्थलशृंगाट इक्षुगन्धा पलंकषा ॥ १४१ ॥
श्वदंष्ट्रा भीरुपर्ण्यां तु शतमूली शतावरी ।
इन्दीवरी बहुसुताप्यहेरुः पीवरीति च ॥ १४२ ॥
285 सुदर्शनायां चक्रांका दध्याली वृषपर्ण्यपि ।
जीवन्त्यां जीवनी जीवा जीवनीया मधुश्च सा ॥ १४३ ॥

चर्मपर्ण्यां तु शार्ङ्गेष्ठा सुताह्वायामुपोदिका ।
ब्रह्मचर्यां सत्यवती ब्राह्मी मत्स्याक्षी सोमवल्लरी ॥ १४४ ॥
मण्डूकपर्ण्यां भण्डीरी भाण्डी योजनवल्ल्यपि ।
290 शोभञ्न्यां पूरणा पूरी वर्षाभ्वी जीवबोधिनी ॥ १४५ ॥
पुनर्नवा च रक्तायां तस्यां योग्या कटिल्लका ।
श्वेतायां वृश्चिकोऽल्पायां दीर्घपत्री विटाटिका ॥ १४६ ॥
अस्या जात्यंतरे स्वल्पे पूरणी हस्तिपूरणी ।
तुण्डिकेर्यां रक्तफला बिंबोष्ठी पीलुपर्ण्यपि ॥ १४७ ॥
295 लज्जालुस्तु नमस्कारी बदर्यञ्जलिकारिका ।
गण्डकाली खदर्यां तु लज्जालुस्स्याच्छमीफला ॥ १४८ ॥
कलंब्यां शतपर्वा स्यात् कलंबूर्वायसी वधा ।
पटुश्चिकायां तु शिवश्शान्तस्स्वस्तिककुक्कुटौ ॥ १४९ ॥
निद्रालुः करुणो मानी वनालुस्सुनिषण्णकः ।
300 मारिषे जीवशाकस्स्यादत्राल्पे तण्डुलीयकः ॥ १५० ॥
मेघनादो विगण्डीरमथ स्युर्देवमारिषे ।
विभाजनो रसोत्सृष्टौ काणमारिष ओलकः ॥ १५१ ॥
लतामारिषतुवरौ वरशाकोलताटिकाः ।
जलजोऽसौ चश्चटकः कुकुण्डे कवकोऽस्त्रियाम् ॥ १५२ ॥
305 भूवल्लूरमहिच्छत्रं भूस्फोटं भूमिकन्दरम् ।
छत्राकश्च सिलिन्ध्रश्च मुकुलेऽस्मिन् पलाण्डुकम् ॥ १५३ ॥
सृगालवास्तुके त्वारुर्वास्तुके क्षारपत्रकः ।
प्रवालो वीरशाकश्च श्रूषायां कासमर्दकः ॥ १५४ ॥
हरिपर्णे मूलकोऽस्त्री सेकिमं बुस्तिका न षण् ।
310 नीलकण्ठोऽथ मरुजे शिवं चाणक्यमूलकम् ॥ १५५ ॥

मत्स्याक्ष्यां शालशालीनौ पत्तूरो लोहमारकः ।
अगस्त्ये मुनिमार्जारावगस्तिर्वंगसेनकः ॥ १५६ ॥
शुकनासोऽप्यथो पश्चात्सुन्दरो ग्रीष्मसुन्दरः ।
कपित्थपत्र्यधःपुष्पी व्रणघ्नी झरसी झरा ॥ १५७ ॥
315 प्रपुन्नाटे त्वेडगजो दद्रुघ्नश्चक्रमर्दनः ।
घोषे कोशफला घण्टा घण्टाला फलिनी फली ॥ १५८ ॥
जाली पटोली झण्डाली कोशातक्यपि चात्र तु ।
पृथौ महाकोशातकी मृदंगः कृतवेधनः ॥ १५९ ॥
ज्योत्स्न्यां स्वल्पफला ग्राम्या मृदंगः कृतवेधनः ।
320 अथ जिंगी दीर्घफला मागधी मलनोत्तमा ॥ १६० ॥
बहुजाल्यां कोशफला वन्या तिक्तपटोलिका ।
कर्कोटिक्यां कोशफला राजकोशातकी फला ॥ १६१ ॥
महाजाली पीतघोषा क्षोडो धामार्गवोऽपि च ।
हस्तिघोषे तरंगोऽल्पे त्वादाली देवदाल्यपि ॥ १६२ ॥
325 चांगेर्यां चुक्रिका दन्तशठांबष्ठाम्ललोण्यपि ।
सुषव्यां तिक्तच्छदनः कारवेल्लः कटिल्लकः ॥ १६३ ॥
राजवल्ल्युरुवल्ल्यंबुवल्ली रञ्जनवल्ल्यपि ।
सुगन्धके तु कर्कोटः किलासघ्नः पटुच्छदः ॥ १६४ ॥
बृहत्कर्कोटके त्वैहो हस्तिकर्कोटको बली ।
330 पटोलके तु राजीवान् रवणः कर्कशः पटुः ॥ १६५ ॥
राजी राजामृतापाण्डुभूतेभ्यश्च फलः परः ।
तिक्ते राजपटोलश्च भीरुस्त्विर्वारुकर्कटी ॥ १६६ ॥
चोदन्युर्वारुवालुक्योऽप्यल्पा सा राजकर्कटिः ।
तुंब्यां पिण्डफलालाबूः कटुतुंब्यां नृपात्मजा ॥ १६७ ॥

335 इक्ष्वाकुर्वासिनी निम्ना वृन्ततुंब्यां तु तुंबुका ।
अल्पतुंब्यां कुक्कुटाक्षो वृन्ते कर्कारुचित्रलौ ॥ १६८ ॥
कालिंगोऽल्पेऽत्र चेह्लाणचेन्नालौ क्रोष्टुकर्कटिः ।
कालिंग्यां छत्रकस्सोमः कर्कारुर्घनवासकः ॥ १६९ ॥
कूश्माण्डकः पुष्यफलः पीतपुष्पो नृपात्मजः ।
340 महाफला शाकफला सुभद्रा शंकुलापि च ॥ १७० ॥
सुखवासे शीर्णवृन्त उग्रगन्धस्सुवासकः ।
त्रिलिंगे त्रपुषे तालुश्छर्दनी हस्तिपर्णिनी ॥ १७१ ॥
चिर्भिटे पुनरुर्वारुर्मृगाद्यां गजचिर्भिटा ।
विटंकोऽतिमृगेर्वारुर्विशालैन्द्रीन्द्रवारुणी ॥ १७२ ॥
345 अथो गवाक्ष्यां गोडुंबा चित्रा च कदले पुनः ।
वृषा वारबुसा रंभा काष्ठीलानंशुमत्फला ॥ १७३ ॥
कदली दीर्घपर्णी च रंभा सा गौरपर्णिका ।
कृष्णा तु लंपा कदली माहेन्द्री तु बृहत्फला ॥ १७४ ॥
सुगन्ध्यल्पफला मोचा साष्ठी काष्ठी कदल्यसौ ।
350 विभीतकस्त्रिलिंगस्स्यात्कलिस्तिष्यः कलिद्रुमः ॥ १७५ ॥
विभीदकः कर्षफलो भूतवासो बहेटकः ।
दैत्यः पापस्तुषः कल्पः कालेयस्तुमुलाक्षकः ॥ १७६ ॥
संवर्तश्च षडश्रायां त्रिलिंग्यामलकी शिवा ।
धात्री कर्षफला तिष्या सेव्याध्यण्डा झटा दृढा ॥ १७७ ॥
355 हरीतक्यां शुक्रसृष्टा नन्दिनी साधिकाभया ।
अव्यथा चेतकी पथ्या धारणी कालकूणिका ॥ १७८ ॥
गुंजायां कृष्णला ताम्रा शार्ङ्गोष्ठा रक्तिका वरा ।
चूडामणिः कपिक्रोडा कालवृन्ती परा नव ॥ १७९ ॥

काकशब्दात् पीलुपीथ्यौ चिंचाणन्त्यदनी नखी ।
360 जंघा तिक्ता च दक्षा च सा शुक्ला चेन्मधुस्रवा ॥ १८० ॥
द्राक्षायां कृष्णिका स्वाद्वी प्रियाला कालमेषिका ।
हारभूरा दारुफला मृद्वीका गोस्तनी रसा ॥ १८१ ॥
मालत्यां रेवती जातिर्यूथिकायां मनोज्वला ।
मानवी चात्र पीतायां वासन्ती हेमपुष्पिका ॥ १८२ ॥
365 मल्लिकायां विचकिलो भूपदी मुक्तबन्धना ।
शतभीरुर्मदयन्ती गवाक्षी तृणशून्यकम् ॥ १८३ ॥
देवमाल्यां वरारोहा गोधामाल्यां तु सेवनी ।
सुरूपायां तृणं वेश्यं काकमाल्यां वनोद्भवा ॥ १८४ ॥
आस्फोता चैकपटलमाल्यां बालाथ रक्तकः ।
370 बन्धूको बन्धुजीवश्च सप्तलायां विभावनी ॥ १८५ ॥
सुगन्धा ग्रैष्मिकाताना मालिका नवमालिका ।
शेफालिका तु निर्गुण्डी नीलिका निवहात्र तु ॥ १८६ ॥
सितायां श्वेतसुरसा वासन्त्यां माधवी लता ।
निस्संगजा कान्तनाला प्रहसन्ती कुटुंबिका ॥ १८७ ॥
375 अतिमुक्तश्च कन्यायां कुमारी तरुणी सहा ।
महासहायामम्लानः पीताम्लाने कुरण्डकः ॥ १८८ ॥
शोणे बली कुरवको झाटेऽस्मिन् कलशोदकः ।
किंकिराते किंकिराटः प्रलोही चापि लातकः ॥ १८९ ॥
सैरेयके तु झिण्टी स्त्री तस्मिन् कुरवकोऽरुणे ।
380 दासी सहाऽप्यार्तगलः कुरण्डश्च सनीलकः ॥ १९० ॥
पीतेऽव्यथः कुरवकस्सहा स्त्री सहचर्यषण् ।
कुन्दे माध्यश्शुक्लपुष्पो वासोऽथ करवीरकः ॥ १९१ ॥

प्रतिहासश्शतप्रासश्शितिकुंभोऽश्वमारकः ।
चंडातोऽश्वरिपुश्श्वेते मरालोऽन्नातिलोहिते ॥ १९२ ॥
385 भुज उग्रविषः काकनासायां शिवमल्लिका ।
बकपुष्पस्तूलपुष्पः काकशीर्षश्शिवप्रियः ॥ १९३ ॥
वसुभट्टः पाशुपत एकाष्ठीलोंऽबुको वसुः ।
नन्द्यावर्ते तु तगरस्तारावटनभोंऽगणौ ॥ १९४ ॥
जपायां रुद्रपुष्पं स्यादत्र पद्मादयोऽपि च ।
390 विदार्यां भूमिकूश्माण्डस्सा तु कृष्णा पलाशिका ॥ १९५ ॥
कोष्ट्रिका क्षीरशुक्लेक्षुगन्धिकेक्षुविदारिका ।
श्वेता क्षीरविदारी सा महाश्वेतर्क्षगन्धिका ॥ १९६ ॥
शारद्यां लांगली तोयपिप्पली-शकुलादनी ।
गोलोम्यां जटिलोग्रोग्रगन्धा तीक्ष्गा जया वचा ॥ १९७ ॥
395 मंगल्या चाथ शुक्ला सा षड्ग्रन्था जललंबिका ।
श्यामा तु सा घुणाभीष्टा काश्मीरी देवदुन्दुभिः ॥ १९८ ॥
कैवर्ती मुस्तकेत्वासौ गुन्द्रायां भद्रमुस्तकः ।
महोदरी वरारोहा नादेयी वलयो वरम् ॥ १९९ ॥
मुस्तायां मुस्तकं न स्त्री सुगन्धः कर्णपूरकः ।
400 शकुलाक्षश्श्वेतमध्यो हंसः पीठरदुन्दुभे ॥ २०० ॥
जलमुस्ते तु प्लवनं गोदर्भं परिपेलवम् ।
कुटन्नटं दशपुरं गोपुरं वर्तकं प्लवम् ॥ २०१ ॥
पालं तु पिंगलं वज्रं श्रीबेरं दीर्घरोमकम् ।
चामरं चमकं ज्येष्ठं बर्हिष्ठं जटिलं जटा ॥ २०२ ॥
405 शैलमूलं तु कच्चोरं पलाशो हिमजा जटी ।
अर्शोघ्न्यां मुसली ताली तालमूली फलिन्यपि ॥ २०३ ॥

खञ्जेऽरिष्टो गृहोछिष्टो रसोनो गृंजनः कटुः ।
कार्यांगं लशुनं दिव्यं महाकन्दामृतोद्भवे ॥ २०४ ॥
जीर्णकं च पलाण्डुस्तु श्वेतकन्दो मुकुन्दकः ।
410 हरितेऽस्मिन् लतार्कस्स्यात् फरुण्डो दुद्रुमो रसः ॥ २०५ ॥
स्वल्पकन्दे हरिद्रक्ते गृञ्जनो गर्जनो गुजः ।
लशुनं दीर्घपत्रं च पिच्छनद्धो महौषधः ॥ २०६ ॥
फरुण्डश्च पलाण्डुश्च लतार्कश्च परारिका ।
गृञ्जनो यवनेष्टश्च पलाण्डोर्दश जातयः ॥ २०७ ॥
415 कन्दं त्वस्त्री चित्रदण्ड उल्लुः कण्डूरसूरणौ ।
अर्शोघ्नो दैत्यमदनः कचूस्तु दलकूर्चिका ॥ २०८ ॥
शकटश्चाथ कालाची नूतनं वेष्टितं दलं ।
शोथशत्रौ महापद्मो मोहो माणो बृहच्छदः ॥ २०९ ॥
वराहकन्दे वाराही चक्रोष्ट्र्यां मालुवा स्त्रियाम् ।
420 मध्वालुको मधुरसः कन्दलः कन्दली समौ ॥ २१० ॥
गौर्यां हरिद्रा रात्र्याख्या हेमघ्नी काञ्चनी परा ।
रोचनी रञ्जनी पीता पिञ्जा पिण्डा मनश्शिला ॥ २११ ॥
तोषणी वर्णिनी बाला विटकान्ता तरंगिणी ।
दार्व्यां दारुहरिद्रा स्यात् पीतदारुश्च पर्जनी ॥ २१२ ॥
425 पचंपचा कर्कटिनी पर्परा पर्पटी वरा ।
कटंकटेरी कालेयः प्रकोष्ठ्यां तु कटूत्कटम् ॥ २१३ ॥
कटुभंगं शृंगिबेरमार्द्रमार्द्रकमस्त्रियौ ।
वेणौ तु वंशकर्मारौ मृत्युपुष्पस्तृणध्वजः ॥ २१४ ॥
त्वचिसारो यवफलःखेलस्तेजनमस्करौ ।
430 चपश्च तेषु पवनोद्धूतध्वनिषु कीचकाः ॥ २१५ ॥

निस्सुषौ विषमो वेणौ क्षुद्रे लगुडवंशिका ।
तृणराजे तलस्तालो महापत्रः फलेरुहः ॥ २१६ ॥
क्रमुके वाटिका घोण्टा गुवाकः क्रूर आसवः ।
कषायो रागवान् पूगः फले पर्कटमस्य तत् ॥ २१७ ॥
435 पक्वं जोडं खरं शुष्कं चिक्कणे चक्कचक्कणे ।
दीर्घवृन्ते रामपूगो लतापूगे तु योजनः ॥ २१८ ॥
भूपूगे लघुकः क्षुद्रफले पाधोवकापि च ।
पूगे गैरेयकश्शैलजातेऽथ स्याछतांकुरः ॥ २१९ ॥
हिन्तालस्तृणराजश्च नालिकेरे तु लांगली ।
440 दाक्षिणात्योऽप्फलोऽबालस्सुतंगः कूर्चकेसरः ॥ २२० ॥
सदाफलो बली चास्मिन् ह्रस्वे स्यात् खुड्कोऽत्र तु ।
रक्ते स्वर्णोऽग्निकश्चाथ परिक्रोणास्य पट्टके ॥ २२१ ॥
खपुरः पूगपट्टोऽथ मधुक्षीरो महारसः ।
परुषः पाण्डुखर्जूरौ तस्मिन् खर्जूरिकाल्पके ॥ २२२ ॥
445 हलीमे केतकी न क्ली दीनो व्यञ्जनजंबुलौ ।
स्त्रीभूषणो रजःपुष्पो गुप्तरागो वलीनकः ॥ २२३ ॥
ताल्यां दृढदला ताडी पत्रनाली वरांगना ।
पत्रला फलपाकान्ता तालाद्यास्स्युस्तृणद्रुमाः ॥ २२४ ॥
सवेणवस्ते त्वक्सारास्तृणानीक्षुयवादयः ।
450 इक्षुर्वृष्यो मधुतृणो मृत्युपुष्पो महारसः ॥ २२५ ॥
खड्गपत्रोऽप्यथानिक्षुर्वायसालीक्षुपालिका ।
इक्षुभेदास्तु कान्तारवंशपुंड्रादयो नरि ॥ २२६ ॥
दर्भोऽश्ववालः काशिर्ना काशोऽस्त्री स्त्रीक्षुगन्धिका ।
कुशे मुनिः कुथो दर्भो वीनाहो यज्ञजागरः ॥ २२७ ॥

455 ऌताकुशे तु शीरी स्त्री धमने सुषिरो नळः ।
शरो मुञ्जो भद्रमुञ्जो गुन्द्रस्तेजनकः खरः ॥ २२८ ॥
मुञ्जस्तु यज्ञियो मेध्यो मृदुत्वक् ब्रह्ममेखलः ।
उञ्छूकस्तूलपो दर्भ ऊर्ध्वमूलः खरच्छदः ॥ २२९ ॥
वालकेश्यां दृढदला जूर्णा कुकणपत्रिका ।
460 पुंभूम्नि बल्बजा वास्यान्तूत्कटस्स्यात् पराशकः ॥ २३० ॥
स्याद्वीरणं वीरतृणं मूलेऽस्योशीरमस्त्रियाम् ।
सेव्या मृणालनलदलामज्जानि जलाशयम् ॥ २३१ ॥
नियुतस्तंबजदृढदैत्यगौरकुदानवम् ।
अभयं चावदाहं च दूर्वा तु हरितालिका ॥ २३२ ॥
465 वरा सहस्रवीर्या च भार्गवी चाथ सा सिता ।
गोलोमी शतवीर्या च गोऽर्गलस्त्वेरका तृणम् ॥ २३३ ॥
सौगन्धिकं देवजग्धं ध्यामकं कत्तृणं पुरम् ।
छत्रातिछत्रपालघ्नौ मालातृणकभूस्तृणे ॥ २३४ ॥
पुञ्जीलस्तु तृणस्तंब इषीका तूलिका समे ।
470 शष्पं बालतृणं शादस्सर्वं तु तृणमर्जुनम् ॥ २३५ ॥

(इति भगवता यादवप्रकाशेन विरचितायां वैजयन्त्यां
भूमिकाण्डे वनाध्यायः)

पशुसङ्ग्रहाध्यायः

सिंहो मृगेन्द्रः पञ्चास्यः पारीन्द्रश्श्वेतपिंगलः ।
व्यादीर्णास्यो महानादश्शार्दूलस्तुल्यविक्रमः ॥ १ ॥
कण्ठीरवो मृगरिपुस्सुगन्धिर्हरितो हरिः ।
हलीक्षणस्तृणसिंहस्स्यात् कुटरुर्मृगसिंहकः ॥ २ ॥
5 व्याघ्रो मृगारिश्शार्दूलो हिंसारुश्चन्द्रकी मृगात् ।
हुण्डश्चाल्पस्त्वयं द्वीपी चुलुको भेलमोहिनौ ॥ ३ ॥
तरक्षुस्तु मृगाजीवस्तिलित्सकमृगादनौ ।
पिण्डारकस्तु चित्रांगो महादंष्ट्रो वरोत्कटः ॥ ४ ॥
वराहस्सूकरो घोणी वक्रदंष्ट्रो जलप्रियः ।
10 पीनस्कन्धस्स्तब्धरोमा कामरूपी तलेक्षणः ॥ ५ ॥
भूदारः कुमुखो घृष्टिस्स्थूलनासो बहुप्रजः ।
पंकक्रीडनकः पोत्री किटिरारवनिकः किरिः ॥ ६ ॥
भल्लूको दीर्घरोमर्क्षौ भल्लाटो वृकधूर्तकः ।
विकरालोऽच्छभल्लश्च गण्डके खड्गखड्गिनौ ॥ ७ ॥
15 वार्ध्राणसो गणोत्साहः कोकस्त्वीहामृगो वृकः ।
महिषस्सैरिभोऽश्वारिर्जलात्मा गद्गदस्वरः ॥ ८ ॥
लुलायः कासरश्शृंगी हेरंबः कृष्णशृंगकः ।
जरन्तः कलुषः पोत्री वीरस्कन्धो रजस्वलः ॥ ९ ॥
स्कन्धशृंगो यमरथः कटाहो दंशलालिकः ।
20 हंसकालीसुतश्चाथ सृजया महिषोऽसितः ॥ १० ॥
गवलश्च परस्वांश्च महिषस्स्यादरण्यजः ।
मृगः प्लावी भीरुचेता वननो मरुको लिगुः ॥ ११ ॥

नित्यशंकी च कृष्णस्तु कृष्णसारो निरञ्जनः ।
यज्ञांग एणस्ताम्रस्तु हरिणस्तृणसंवरः ॥ १२ ॥
25 राजीवस्त्वेष राजीमान् सितक्रोडस्स चीनकः ।
शंबरस्स्वल्पहरिणः पृषतस्तु स बिन्दुमान् ॥ १३ ॥
रुरुर्महान् कृष्णसारः कुरंगो हरिणो महान् ।
रोहिदृश्यो हरिणवन्मृदुशृंगः प्रतापसः ॥ १४ ॥
न्यंकुस्तु शंबराकारस्त्रिकेण विपुलोन्नतः ।
30 परंपरस्तु गोकर्णः पोटरूपस्तु तत्समः ॥ १५ ॥
रौहिषो गर्दभाभासो रोहितश्श्वेतराजिमान् ।
वातायुस्स्याद्वातमृगो जवी वातप्रमीश्शिवः ॥ १६ ॥
प्रियको रोमभिर्युक्तो मृदूच्चमसृणैर्घनैः ।
नीलस्स श्वेतरेखावानथवा श्वेतचन्द्रकः ॥ १७ ॥
35 कदली तु बिले शेते मृदुरूक्षोच्चकर्बुरैः ।
नीलाग्रैरोमभिर्युक्ता सा विंशत्यंगुलायता ॥ १८ ॥
श्यामिका तु श्वेतबिन्दुश्श्यामला षोडशांगुला ।
चतुरा तु घनस्निग्धरोमा श्यामा सचन्द्रका ॥ १९ ॥
कालका त्वसिता यद्वा कपोता पिङ्गबिन्दुका ।
40 सामूना तु समूरुर्ना सार्धहस्तसमायता ॥ २० ॥
गोधूमाभाथवा कृष्णा स्निग्धोच्चमृदुरोमिका ।
चीनस्तु चीनसी स्त्रीत्वे कपोता त्रिंशदंगुला ॥ २१ ॥
मरुजा तूच्चमसृणमृदुपाण्डुररोमिका ।
रोमराजीमती मध्ये द्वादशांगुलसंमिता ॥ २२ ॥
45 चनका तु चमूरुर्ना सिताभा यदि वासिता ।
कृष्णरोमानुविद्धा वा पुच्छोऽस्या न भवत्यपि ॥ २३ ॥

सेलिसस्तु मृदुश्वेतरूक्षोच्चघनरोमकः ।
चमूरुस्तु महाग्रीवस्सितः केसरवाञ्जवी ॥ २४ ॥
कदली तु श्यामवर्णा हस्तायामा महोदरी ।
50 एते स्युः कृष्णसाराद्या मृगा अजिनयोनयः ॥ २५ ॥
शशतुल्या विजातिश्च रक्ताभा मृगमातृका ।
बिलेशया तु क्रिमिरा कुमारी तु हिमद्युतिः ॥ २६ ॥
कुचारुश्चारुपुच्छस्स्यात् सुविषाणो वृषाकृतिः ।
कृतारुस्तु स निष्पुच्छो जायते हिमवत्तटे ॥ २७ ॥
55 रुचुस्तु शुक्लो मेषाभः स पीतस्सूकराकृतिः ।
कृष्णे शृंगे च तस्याथ कृतमालो वृकाकृतिः ॥ २८ ॥
सृमरस्स्याद्वालमृगः परुर्ना चमरी न षण् ।
कालपुच्छस्तु तत्प्रायो नामार्थेनैव भिद्यते ॥ २९ ॥
चारुकस्तु किशोराभः कन्दरस्तूच्चजानुकः ।
60 मृगास्स्युः कृष्णसाराद्यास्त एव पशवस्सह ॥ ३० ॥
सिंहाद्यैश्च शशाद्यैश्च ग्राम्यैश्चैव गवादिभिः ।
शशस्तु रोमकर्णस्स्यान्मृदुरोमा च शूलिकः ॥ ३१ ॥
गन्धर्वस्स्याद्गोलपुसो रामस्तु वृकधोरणः ।
शरभस्तु गजारातिरुत्पादश्चाष्टपादपि ॥ ३२ ॥
65 गवयस्स्याद्वनगवो गोवाही ब्राहवारणः ।
कोलांगकस्तु जलको भालुको भल्लुकाकृतिः ॥ ३३ ॥
पुरोही स्यात्कुलचरो ललनाक्षो वृकाकृतिः ।
कोदंगस्स्याज्जन्तुधरो मार्जारी चमराकृतिः ॥ ३४ ॥
शालिजातस्तु खट्टासः पूतिः खट्टासिकापि च ।
70 शिवेव स्यात् गन्धमृगः कस्तूरी मृगपालिका ॥ ३५ ॥

अण्डौ तु तस्याः कस्तूरी राजार्हं शितिचन्दनम् ।
मार्जारिका वेधमुख्या मदनी गन्धचेलिका ॥ ३६ ॥
श्वाविच्छललशल्यौ तल्लोम्न्यना शलली शलम् ।
सृगालो भरुजः क्रोष्टा श्वभीरुर्मृगमत्तकः ॥ ३७ ॥
75 शयालुस्सूचको घोरः फेरुफेरुण्डफेरवाः ।
मृगधूर्तो भूरिमायो गोमायुर्वृकधूर्तकः ॥ ३८ ॥
किखिस्त्री क्रोष्टुभेदेऽल्पे पृथौ लोपाशगृण्डिवौ ।
वानरो मर्कटः कीशः कपिश्शाखामृगो हरिः ॥ ३९ ॥
महावेगो दधिमुखः कुरंगो भल्लुकः पृथुः ।
80 वलीमुखो वनौकास्स गोलांगूलोऽसितानन: ॥ ४० ॥
नीलशीर्षोऽप्यथ क्ष्विको वानरो रोहितानन: ।
शृंगिणी सौरभेयी गौरघ्न्या माहेय्युषा शुभा ॥ ४१ ॥
अनड्वाह्यनडुह्युस्रा तंबा तंपा निलिंपिका ।
रजःपूता च कृष्णाऽसौ बहुला क्षितिसंभवा ॥ ४२ ॥
85 सिता तु धवला पुण्ड्रा सुनन्दा जलसंभवा ।
कपिला त्वग्निजा दाक्षी सुरभिः कामरूपिणी ॥ ४३ ॥
रक्तवर्णा रोहिणी स्याच्छीतला वायुसंभवा ।
शबली तु प्रक्षरांगी सुमना व्योमसंभवा ॥ ४४ ॥
वरांगा तु चतुर्वर्षा द्विवर्षा तु द्विहायनी ।
90 एकहायन्येकवर्षा बहुक्षीरा तु वञ्जुला ॥ ४५ ॥
नैचिकी गौर्गवां श्रेष्ठा भद्रा गौर्गोमतल्लिका ।
काल्योपसर्या प्रजने पलिक्नी बालगर्भिणी ॥ ४६ ॥
पष्ठौह्यन्या वशा वन्ध्या वेहद्गर्भोपघातिनी ।
अवतोका स्रवद्गर्भा वत्सकामा तु वत्सला ॥ ४७ ॥

95 चिरसूता बष्कयणी गृष्टिस्सूतवती सकृत् ।
समांसमीना सा गौर्या प्रतिवर्षं प्रसूयते ॥ ४८ ॥
पीनस्तनी तु पीनोध्नी सुखदोह्या तु सुव्रता ।
दुःखदोह्या तु करटा प्रस्तुता प्रसवोन्मुखी ॥ ४९ ॥
द्रोणक्षीरा द्रोणदुघा बहुसूतिः परेष्टुका ।
100 धेनुर्नवप्रसूता गौर्धेनुष्या बन्धके स्थिता ॥ ५० ॥
अभिवान्यान्यवत्सा गौर्वृषाक्रान्ता तु सन्धिनी ।
आपीनमूधो वृन्तं तु स्तनो वत्सस्तु तर्णकः ॥ ५१ ॥
विषाणी वृषभश्शृंगी वाहो गौरक्षधूर्तिलः ।
उक्षा गौर्वृषलोऽनड्वान्वाह्यस्स्कन्धवहो वही ॥ ५२ ॥
105 सौरभेयो बलीवर्दो बाडवेयश्च शाक्करः ।
षण्डस्तु गोपतिश्श्रीमान् डंक इट्वर ईश्वरः ॥ ५३ ॥
ककुद्मी गोवृषो घोणः ककुद्मान्मदकोहलः ।
जातोक्षो जातमात्रोक्षा दम्यो वत्सतरस्समौ ॥ ५४ ॥
महोक्षस्स्यादुक्षतरो वृद्धोक्षस्तु जरद्गवः ।
110 आर्षभ्यषण्डतायोग्यो नैचिक्याः प्राक्परे त्रिषु ॥ ५५ ॥
भग्नशृंगपशुः कूटः प्रष्ठवाड्युगपार्श्वगः ।
स्थूरी पृष्ठ्यः पृष्ठवाह्यस्स्कन्धिकस्स्कंधवाहकः ॥ ५६ ॥
नस्योतो नस्तिते षोडन् षड्देऽथो धुरंधरे ।
धुरीणधुर्यधौरेयाः प्रासङ्गादेस्तु वोढृषु ॥ ५७ ॥
115 प्रासंग्यश्शाकटो युग्यो हालिकस्सैरिकादयः ।
एवं सर्वधुरीणैकधुरीणैकधुरा अपि ॥ ५८ ॥
कर्णः कर्णविहीनस्स्यात् पण्डस्तु च्छिन्नपुच्छकः ।
गोमान् गोमी च गोस्वामी गोविन्दोऽधिकृतो गवाम् ॥ ५९ ॥

नैचिकी गोश्शिरोदेशस्सास्ना तु गलकंबलः ।
120 गोशकृद्गोमयो न स्त्री गोग्रन्थिश्शुष्कगोमयः ॥ ६० ॥
दोहलं तु करीषोऽस्त्री गोकुलं गोधनं समे ।
गोमहिष्यादिकं जीवधनं स्यात्पाशबन्धनम् ॥ ६१ ॥
छगस्तु छगलश्छागो लंबकर्णस्स्तभः पशुः ।
बस्तोऽजश्च छगी मञ्जी सर्वभक्षा गलस्तनी ॥ ६२ ॥
125 चुलुंपा चित्रला हृद्या पर्णादा पलिकिन्यजा ।
इलिकस्तु वनच्छागो वालवीज्यो निरायसः ॥ ६३ ॥
मेषे शृंगिणसंफालवृष्णिपेत्वहुलुहूदाः ।
एडकोऽप्युरणो मीढ उरभ्रो रोमशोऽप्यविः ॥ ६४ ॥
मेषी तु कुररी वेणी जालकिन्यविला रुजा ।
130 खररासभचक्रीवद्वाहवालेयगर्दभाः ॥ ६५ ॥
रूक्षस्वरो धूम्रकर्णो नेमिर्भारसहश्शलः ।
चिरमेही गर्दनकः कोलिण्टो वडबापतिः ॥ ६६ ॥
करभश्च मयस्तूष्ट्रो महाग्रीवः क्रमेलकः ।
दाशेरकश्च रवणः करभस्स्यादसौ शिशुः ॥ ६७ ॥
135 करभास्स्युश्शृंखलका दारवैः पादबन्धनैः ।
श्वा सारमेयश्शुनको भषणो मृगदंशकः ॥ ६८ ॥
दीर्घनादी गृहमृगः कुक्कुरः क्रोधनश्शुनिः ।
यक्ष इन्द्रमहश्श्वालः कपिलो मण्डलश्शुनः ॥ ६९ ॥
जिह्वापानः पुरोगामी कृतज्ञो रात्रिजागरः ।
140 कौलेयकोऽस्थिरवादश्च भवनो भलुहोऽपि च ॥ ७० ॥
शुनी तु सरमा श्वाली विट्चारो ग्रामसूकरः ।
ओतुर्बिडालो मार्जार आखुभुक् पृषदंशकः ॥ ७१ ॥

जाहको गात्रसंकोची मण्डली नखरायुधः ।
पशुस्तु मलुको मोकः कपश्शुद्धजडश्चरिः ॥ ७२ ॥
145 बाले तु बर्करस्सूता तूबरश्शृंगवर्जितः ।
हिंस्रो व्याघ्रादिको व्यालश्श्वापदो मरुलश्शरिः ॥ ७३ ॥
पुच्छोऽस्त्री लूम लांगूलं वालहस्तश्च वालधिः ।
खुरश्शफश्शको विष्ठा घासस्तु यवसश्शरिः ।
149 रोमन्थनन्तु रोमन्थरोमोर्णोर्णास्तुकोऽपि च ॥ ७४॥ ॥

(इति भगवता यादवप्रकाशेन विरचितायां
वैजयन्त्यां भूमिकाण्डे पशुसङ्ग्रहाध्यायः)

मनुष्याध्यायः

मनुष्या मानुषा मर्त्या मनुजा मानवा नरः ।
द्विपादो नहुषा गोधा व्राताः पञ्चजना नराः
ब्रह्मक्षत्रियविट्शूद्रा इति वर्णाश्चतुष्टये ।
उपवर्णास्तु संकीर्णा विवर्णास्त्वन्त्यजातयः
5 एकवर्णास्सवर्णास्स्युर्हीनवर्णास्तु जंगिताः ।
सवर्णं ब्राह्मणाद्राज्ञी सूते मूर्धावसिक्तकम्
वैश्यांबष्ठं निषादं तु शूद्रा पारशवश्च सः ।
एते विवाहजाः पुत्रा व्यभिचारसुताः पुनः
अभिषिक्तः कुंभकारश्शूलिकश्च यथाक्रमम् ।
10 विप्रादावृतमुग्रस्त्री निषादी तु मनोजवम्
अंबष्ठकन्या त्वाभीरं खञ्जमन्तावसायिनी ।
आयोगवी धिग्वनकं कुक्कुटी तु पराजकम्
भृज्जकण्ठी तु सौधातं शनकी तु बहिर्गरम् ।
वैदेहकी कारुविन्दं मैत्री रन्ध्रं भटी सटम्
15 चण्डाली तु श्वचण्डालं शबरी तु परिच्छदम् ।
कालकिश्वं तु करणी यवनी यावशादनम्
नटी भटं खषी द्रोहं मागधी तु दमण्डकम् ।
पराजकी तु सिद्गुण्डं कारुविन्दी कुविन्दकम्
रथकारी रथाश्मानमावृती तु खरुञ्जकम् ।
20 धूता पारावतं सूते श्वपाकी पालुखंजनम्
पुल्कसी भर्मिणं सूते धीवरी तीवरं ततः ।
एते ब्राह्मणपुत्रास्स्युर्नानायोषित्समुद्भवाः

सूतं विप्रा नृपाद्वैश्या माहिष्यं यवनश्च सः ।
अश्वपण्यमनूढा सा शूद्रानूढैव शूलिकम् ॥ १२ ॥
25 उग्रमूढा निषादी तु वेणुकं कुक्कुटी कुटम् ।
तीवरी महिषं वेनी रट्टासं पुल्कसी बकम् ॥ १३ ॥
चण्डाली रुचिटं मल्ली पल्लमुग्री झषा परम् ।
श्वपाकी कलुषं सूता कीलुषं घर्घरी मिषम् ॥ १४ ॥
सिद्रुण्डी डिण्डिकं जल्ली भ्रकुश्चं शनकी कचम् ।
30 कची भ्रेणं भ्रकुश्री तु पागलं पागली गिलम् ॥ १५ ॥
एते क्षत्रियपुत्रास्स्युर्नानायोषित्समुद्भवाः ।
वैश्याद्वैदेहकं विप्रा क्षत्रकन्या तु मागधम् ॥ १६ ॥
शूद्रा तु करणं सैव जारात्कटकरं ततः ।
कटकर्मा स वेनी तु वागुरं वेणुकी वटम् ॥ १७ ॥
35 अंबष्ठी कोहलं रन्ध्री घर्घरं विन्दकी भ्रषम् ।
कारुविन्दी पराविद्धमुग्री वेशं कुटी मटम् ॥ १८ ॥
कुक्कुटी पलिनम्मेदी मालुकं मालुकी मकम् ।
चण्डाली नीलिकं वाटी मेणकं करणी वशम् ॥ १९ ॥
रथकारी सनालिंगं वैदेही वानवासिकम् ।
40 श्वपाकी पाणिशं मल्ली विबुकं डिण्डिकी कशम् ॥ २० ॥
मैत्री वाटं नटी भोलं प्रसूते कीलुषी किटम् ।
घर्घरी घिर्मिणं घोलमित्येते वैश्यसूनवः ॥ २१ ॥
चण्डालं ब्राह्मणी शूद्रात् क्षत्रिया पारधेनुकम् ।
वेलवं सैव चौर्येण वैश्या त्वायोगवं ततः ॥ २२ ॥
45 चौर्यात् सा चाक्रिकं वेनी वंशिकं फलिनी कुथम् ।
निषादी कुक्कुटं भिल्ली शबरं कोहली नसम् ॥ २३ ॥

पुल्कसी कवटं वाटी मंजनं मालुकी मलम् ।
वैदेहकी नीवलकं धीवरी कलशीनकम् ॥ २४ ॥
भृज्जकण्ठी कुवादुष्कं करणी कालशीनकम् ।
50 सूता मालसुपर्णाण्डौ सैरन्ध्री रथवारकम् ॥ २५ ॥
नटी भ्राणञ्जकं वाटी विभण्डं द्रमिडी द्रुहम् ।
कैवर्ती धीवरं रन्ध्री कलशं यवनी क्षुदम् ॥ २६ ॥
कारावती सुललिकं कुवादुष्की वशामरवम् ।
चण्डाली पाण्डुकं द्रोही छाणकं महिषी पुरम् ॥ २७ ॥
55 वरुटी रुण्डकं घोली वीलकं कवटी पुटम् ।
एते शूद्रस्य पुत्रास्स्युर्नानायोषित्समुद्भवाः ॥ २८ ॥
निषादाद्ब्राह्मणी भेकं क्षत्रिया कालकुण्डकम् ।
वैश्या सूचिं हरिं शूद्रा सोऽपि चायोगवः क्वचित् ॥ २९ ॥
कैवर्ती बुरुलं भिल्ली शनकं शनकी रसम् ।
60 श्वपाकी गर्मुटं घोली घर्घरं द्रमिडी कणम् ॥ ३० ॥
वैदेही कलशं द्रोही भ्रेणकं छाणकी लुपम् ।
रथकारी मन्दुपालं मागधी मड्डुकैरिकम् ॥ ३१ ॥
आयोगवी तु कैवर्तं निषादान्मार्गरश्च सः ।
एते निषादपुत्रास्स्युर्नानायोषित्समुद्भवाः ॥ ३२ ॥
65 जालं वैदेहकाद्विप्रा क्षत्रिया रथकारकम् ।
वैश्या धन्ववनं शूद्रा गैरुषं करणी कृमिम् ॥ ३३ ॥
अंबष्ठी बेनमुग्री तु गर्गरं शनकी हनुम् ।
आयोगवी तु मैत्रेयं पुल्कसी कणकुक्कुटम् ॥ ३४ ॥
निषादी मेदमन्ध्रन्तु सैव चेन्नान्यपूर्विका ।
70 एते वैदेहपुत्रास्स्युर्नानायोषित्समुद्भवाः ॥ ३५ ॥

मैत्रेयाद्ब्राह्मणी लालं क्षत्रिया जालभूषणम् ।
वैश्या छण्डझटं शूद्रा निषादी लोहमालकम् ॥ ३६ ॥
आयोगवी तु मधुकं घाण्टिकं नान्यपूर्विका ।
एते मैत्रेयपुत्रास्स्युर्नानायोषित्समुद्भवाः ॥ ३७ ॥
75 विप्रा नाविकमंबष्ठादस्मिन् क्वापि श्वपाकवाक् ।
वैणवं सैव माहिष्याद्व्रजकं पारधेनुकात् ॥ ३८ ॥
श्वपचं सैव चण्डालाच्चर्मकञ्चुकजीवनम् ।
मागधात्ताम्रजीवं सा तक्षाणं करणादसौ ॥ ३९ ॥
आयोगवाच्चर्मकारं राज्ञी वार्मिकसूचकौ ।
80 माहिष्याच्चर्मकारं सा खनकं मागधादसौ ॥ ४० ॥
उद्बन्धं खनकाच्छूद्रा स्पृश्यमंबरनेजकम् ।
अधोनापितमंबष्ठा करणान्मत्स्यबन्धकम् ॥ ४१ ॥
वैश्या सामुद्रमाजीवेत् पण्यं सामुद्रमेव सः ।
निषादी धिग्वनाच्चर्मकारं कारावरोऽपि सः ॥ ४२ ॥
85 कारावरो निषादेन वैदेह्यामिति के चन ।
वैदेही पाण्डुसोपाकं चण्डालात् कुंकणश्च सः ॥ ४३ ॥
आहिण्डिकं निषादात् सा कवटी तु हुरिञ्जकम् ।
निष्ट्याच्छूद्रा मधुश्रेणिं शौण्डिकं मण्डहारकम् ॥ ४४ ॥
उग्री क्रमेलकं तस्मान्निर्णेक्ता रजकश्च सः ।
90 सोपाकं पुल्कसी निष्ट्याच्चण्डालादिति के चन ॥ ४५ ॥
अन्ध्री तु शबरान्निष्ट्यं भिल्लं सा निष्ट्यपूर्विका ।
किरातं पर्णशबरी शबरान्निष्ट्यपूर्विका ॥ ४६ ॥
पुलिन्दपर्णशबरौ किराती निष्ट्यपूर्विका ।
पुलिन्दश्वपचौ निष्ट्यात् किराती नान्यपूर्विका ॥ ४७ ॥

95 रथकारं तु माहिष्यात्करणी माहिषाङकम् ।
पुल्कसं सैव चण्डालात् किरातात्पलगण्डकम् ॥ ४८ ॥
चण्डालात्पुल्कसी डोंबं निषाद्यन्तावसायिनम् ।
डोंबी स्वषं सैव निष्ट्यात् बिभेणं हड्डिकं स्वषी ॥ ४९ ॥
तीवरी धीवरात्पौण्ड्रं बर्बरं यवनादसौ ।
100 पुल्कसात्पामरं वेनाच्छुषं डोंबाद्वराणकम् ॥ ५० ॥
श्वपाकं क्षत्तुरुग्रस्त्री केचिदाहुर्विपर्ययम् ।
चूचुं किराती शबराद्वैदेहात्पुल्कसात् क्वचित् ॥ ५१ ॥
निष्ट्यात्तु वरुटी मल्लं वल्लारन्तु किरातिका ।
निषादपुल्कसाद्यास्तु पूर्वोक्ता इह नोत्तरे ॥ ५२ ॥
105 विप्रा व्रात्यात् भृज्जकण्ठमावन्त्यं विप्रपूर्विका ।
अध्यूढा वाटधानं सा शैखं सा नान्यपूर्विका ॥ ५३ ॥
सा पुष्पत्रं पुष्पवती सम्यगूढा द्विजन्मना ।
लिच्छिविं क्षत्रिया व्रात्याज्झल्लं सा विप्रपूर्विका ॥ ५४ ॥
व्रात्यपूर्वा तु सा मल्लं क्षत्रपूर्वा तु सा नटम् ।
110 प्राक्प्रसूतस्वजातिस्सा वरुटं करणश्च सः ॥ ५५ ॥
सा वैश्यपूर्वा द्रमिडं शूद्रपूर्वा तु सा स्वषम् ।
वैश्या व्रात्यात् सुधन्वानमाचार्यं विप्रपूर्विका ॥ ५६ ॥
सुधन्वाचार्य एको वा मैत्रं सा वैश्यपूर्विका ।
शूद्रपूर्वा द्विजन्मानं सात्त्वतं क्षत्रपूर्विका ॥ ५७ ॥
115 अपूर्वा भारुषं कारुं ब्रह्मक्षत्रविशाममी ।
व्रात्यानां क्रमशः पुत्राश्शूद्रा व्रात्याच्छ्वकण्टकम् ॥ ५८ ॥
कुर्वन्त्यनुपनीता ये विवाहं ब्राह्मणादयः ।
व्रात्या व्रातश्च ते सर्वे तत्सुताश्चावृतासु ये ॥ ५९ ॥

अवरेटस्सवर्णायां जाराज्जातस्सवर्णकात् ।
120 पत्यौ जीवति कुण्डोऽसौ भर्तर्यसति गोलकः ॥ ६० ॥
अविवाह्यासु जाताश्च तथा स्युः कुण्डगोलकाः ।
ये च प्रव्रजितापुत्रास्तथा प्रव्रजितस्य ये ॥ ६१ ॥
क्षत्रकुण्डः पट्टबन्धो भोजः क्षत्रियगोलकः ।
देवप्रैष्यो विप्रकुण्डो ग्रामप्रैष्यस्तु गोलकः ॥ ६२ ॥
125 मणिकारो वैश्यकुण्डश्शंखकारस्तु गोलकः ।
शूद्रकुण्डो मालवको घासहारस्तु गोलकः ॥ ६३ ॥
एषां लक्षणसिद्ध्यर्थं केषां चिद्वृत्तिरुच्यते ।
उक्ता प्रागेव केषां चिन्नाम्ना केषां चिदूह्यते ॥ ६४ ॥
मूर्धावसिक्तस्सेनेशो धनुर्वेद्यस्त्रधारकः ।
130 मणिमन्त्रौषधिज्ञश्च सोऽबष्ठो यानशिक्षया ॥ ६५ ॥
चिकित्सागणितज्योतिर्ज्ञानी स्यादभिषिक्तकः ।
अंबष्ठो भृज्जकण्ठोऽस्य चिकित्सा शस्त्रसाधना ॥ ६६ ॥
कक्ष्याजीवात्स दौष्षन्तो निषादो ध्वजघोषणात् ।
कुंभकारो भाण्डवृत्तिरेष स्यादूर्ध्वनापितः ॥ ६७ ॥
135 नाभेरूर्ध्वं वपन् पुंसां सूतकप्रेतकादिषु ।
चित्रमर्दलनृत्तज्ञः कालीं पारशवोऽर्चयेत् ॥ ६८ ॥
शूलिको दण्डयेद्दण्ड्यान् शूलारोपादिकर्मणा ।
निषादो मृगघातात्स माहिष्यो नृत्तगीतवित् ॥ ६९ ॥
स एव मंकुशोऽथासौ निषादस्सस्यरक्षया ।
140 जीवन् सवर्णो नक्षत्रैस्सोऽबष्ठो वैद्यशास्त्रवित् ॥ ७० ॥
महानर्मा च मद्गुश्च स श्रेष्ठी वैश्यवृत्तितः ।
अश्वपण्यस्त्वाश्विकाख्यस्सोऽश्वव्यापारजीवनः ॥ ७१ ॥

उग्रो दण्ड्यान्दण्डयेत्स दौष्यन्तो मत्स्यघातनात् ।
निषादो व्यालादिवधाद्यवनः कुञ्जरग्रहात् ॥ ७२ ॥
145 पुरो धावन् पारशवो राज्ञश्शस्त्रञ्च धारयन् ।
धनान्तःपुररक्षश्च शूलिकश्शूलिकोपमः ॥ ७३ ॥
करणो लेखको राज्ञां वारकश्शकनामकः ।
चूचुकश्शाकतांबूलक्रमुकादिकविक्रयात् ॥ ७४ ॥
रथकारो निधिप्रश्नद्यूतापणनिरूपणात् ।
150 रथकारो व्यालमृगहिंसावृत्तिरिति क्वचित् ॥ ७५ ॥
उग्रः पारशवो दुर्गधनान्तःपुरपालनात् ।
अन्वर्थस्स्यात् कटकरो द्वादशैतेऽनुलोमजाः ॥ ७६ ॥
इतिहासपुराणज्ञस्सूतो देवांश्च पूजयेत् ।
सूत ऊढासुतः पक्ता स्थानालंकरणादिकृत् ॥ ७७ ॥
155 सोऽनूढाजो रथाश्वानां वाहको रथकारकः ।
वैदेहकस्य स्त्रीरक्षा स वन्दी स्तुतिजीवनात् ॥ ७८ ॥
मौकल्यो रामको वस्त्रस्यूतिरञ्जनजीवनात् ।
मागधोऽसावनूढाजो जंघाकरिकवृत्तिकः ॥ ७९ ॥
वाप्याद्यवतरेच्छुध्यै क्षालयेन्मलिनांबरम् ।
160 वणिक्पथे मागधस्य वाग्मी राजप्रबोधनम् ॥ ८० ॥
चूचुको वेधनेनासौ स वन्दी स्तुतिकर्मणा ।
वैतालिको बोधनया वेणुवीणादिवादनैः ॥ ८१ ॥
धीवरो मार्गसंत्राणाद्रामको दौत्यजीवनात् ।
आयोगवः पुल्कसश्च स वासःकांस्यजीवनात् ॥ ८२ ॥
165 चौर्याज्जातः पुलिन्दोऽसौ स हन्ता दुष्टसत्त्वकान् ।
चण्डालो झल्लरीकक्षो वर्ध्रीकण्ठो मलं हरेत् ॥ ८३ ॥

स्यात्पारधेनुको वेनो गोधादिवधबन्धकृत् ।
स निषादो मत्स्यघातान्मद्गुराघोषणेन सः ॥ ८४ ॥
क्षत्ता दौत्यद्वारपाल्यात् पुल्कसो मद्यविक्रयात् ।
170 पेलवः पुनरस्पृश्यो जंभको नृत्तगानवित् ॥ ८५ ॥
आयोगवस्तैजसकृत्कूमकृन्मणिवेधकृत् ।
स तक्षा तक्षणाज्जीवन् स्थपतिर्नगराधिकृत् ॥ ८६ ॥
अन्तावसायी वपनान्मागधश्चित्रकर्मणा ।
स वैदेहः पाशुपाल्यात्तद्रसानाञ्च विक्रयात् ॥ ८७ ॥
175 पुल्कसस्तान्तवेनासौ चाक्रिकस्तैलविक्रयात् ।
लवणक्रीतकोऽसौ स्याल्लवणस्यैव विक्रयात् ॥ ८८ ॥
एवमेकादश प्रोक्ता वर्णानां प्रतिलोमजाः ।
गोधादिवधबन्धास्तु हरीणां पुल्कसाश्च ते ॥ ८९ ॥
रथकारो वास्तुवृत्तिरिज्याधानोपनीतिमान् ।
180 आवृतानान्तु हस्त्यश्वस्यन्दनेष्वधिकारिता ॥ ९० ॥
शूर्पच्छत्रादिकर्माणि सूचीनां ते च पुल्कसाः ।
कैवर्तानां पक्षिपशुमृगघातनजीवनम् ॥ ९१ ॥
अन्ध्राणान्तु गृहद्वाररथ्यावस्करशोधनम् ।
मेदानां चक्रवृत्तित्वं विण्मूत्रग्रहणोज्झनम् ॥ ९२ ॥
185 आहिण्डिकानां कारासु बहिः स्थित्वाभिरक्षणम् ।
मेदान्ध्रचूचुमद्गूनामारण्यपशुहिंसनम् ॥ ९३ ॥
मैत्रेयकः प्रशंसेन्नॄन् घण्टाताडोऽरुणोदये ।
पारावरश्छत्रधरो दीपधृद्वाहको नृणाम् ॥ ९४ ॥
कुर्यादासनरक्षाञ्च चर्मच्छेदनसीवनम् ।
190 कुक्कुटानां शस्त्रकृती राज्ञां कुक्कुटखेलनम् ॥ ९५ ॥

मागधादपि शूद्रायां कुक्कुटो नाम जायते ।
योऽन्वेष्टोद्यानवप्रादेर्वैश्याज्जातोऽपि कुक्कुटः ॥ ९६ ॥
निषाद्यां तन्तुवायोऽसौ वृक्षच्छेदावरोपकृत् ।
धिग्वनानां तु कार्मार्यं वेनानां भाण्डवादनम् ॥ ९७ ॥
195 वेणः कुशीलवश्चासौ लंघनप्लवनादिभिः ।
वेणो राज्ञीसुतोऽप्युग्रान्मायासम्मोहनादिकृत् ॥ ९८ ॥
वैदेह्यंबष्ठजो वेनो नाट्यरंगावतारकृत् ।
आभीराणां जीवधनं कूटानामश्मतक्षणम् ॥ ९९ ॥
नौवाहो मार्गरो नद्यां नाविकस्त्वब्धिनौगमः ।
200 शैखोऽभिचारं कुर्वीत कार्मणं भृज्जकण्ठकः ॥ १०० ॥
मन्त्रौषधैर्द्विषत्सेनां वशी कुर्वीत पुष्पवः ।
आवन्त्यो वाटधानश्च स्वसेनाचित्तवृत्तिवित् ॥ १०१ ॥
व्रात्याः क्षत्रसुताश्शत्रुकोशमन्त्रादिवेदिनः ।
खषाणां तोयाहरणं द्रमिलानां प्रपाकृतिः ॥ १०२ ॥
205 नटानां करणानाञ्च चारवृत्तिस्स्फुटास्फुटा ।
भारुषस्त्वर्चयेन्मातृश्श्मशानादि चतुष्पथम् ॥ १०३ ॥
सुधन्वाचार्य ईशानं शाक्यचैत्यादि मैत्रकः ।
भूतप्रेतपिशाचांस्तु विजन्मा सूतिवेश्म च ॥ १०४ ॥
सात्त्वतः पूजयेद्विष्णुमुक्तो भागवतश्च सः ।
210 संति भागवताश्चान्ये ब्राह्मणा भगवत्पराः ॥ १०५ ॥
श्वकण्टकस्य शूद्रादि मालवस्याश्वपालनम् ।
वैणवीं पाण्डुसोपाकस्सोपाको मूलवृत्तिकः ॥ १०६ ॥
श्मशानचेलरक्षादिवृत्तयोऽतावसायिनः ।
वनश्मशानरक्षा तु चण्डालांतावसायिनाम् ॥ १०७ ॥

215 गरानलप्रयोगाश्च प्रोच्यन्ते दस्युजातयः ।
ब्राह्मणस्य त्रयः पुत्रा वर्णस्त्रीष्वनुलोमजाः ॥ १०८ ॥
शूद्रस्य च त्रयः पुत्रास्तास्वेव प्रतिलोमजाः ।
त्रयस्त्रयः क्षत्रविशोः प्रतिलोमानुलोमजाः ॥ १०९ ॥
एते द्वादश वर्णानां पुत्रा एकैकशस्तु ते ।
220 चातुर्वर्ण्ये प्रसूयन्ते चतुरश्चतुरस्सुतान् ॥ ११० ॥
ते चत्वारिंशदष्टौ च पूर्वैर्द्वादशभिस्सह ।
ब्राह्मणाद्यैश्चतुर्भिश्च चतुष्षष्टिर्हि जातयः ॥ १११ ॥
ते सर्वे दस्यवो दोषैश्चौर्याद्यैस्सद्बहिष्कृताः ।
आसाविकस्तु सैरिन्ध्रो दस्योरायोगवीसुतः ॥ ११२ ॥
225 दस्यूनां बहुजातित्वाद्बह्व्यस्सैरिन्ध्रजातयः ।
प्रसाधनोपचारज्ञा मृगादिवधजीवनाः ॥ ११३ ॥
शाकपुष्पफलानाश्च विक्रेतारो बहिष्कृताः ।
राजस्त्रीणां सूतिकानां द्वास्थाः प्रेतांबरावृताः ॥ ११४ ॥
विक्रेतारस्सुरां कृत्वा सैरिन्ध्रास्स्युर्यथोचितम् ।
230 दस्युम्लेच्छगणानान्तु कृषिशस्त्रोपजीवनम् ॥ ११५ ॥
म्लेच्छास्स्युर्विप्रकृष्टा ये म्लेच्छवाचो वनौकसः ।
कार्या क्षत्त्रुग्रवैदेहैरन्या वृत्तिरगर्हिता ॥ ११६ ॥
मेदान्ध्रैर्गर्हिता वृत्तिरनुक्ताः कुलवृत्तयः ।
तत्रापि मातृकीं वृत्तिं गर्हितामनुलोमजाः ॥ ११७ ॥
235 भजेरन् प्रतिलोमास्तु पैतृकं कर्म गर्हितम् ।
अनुलोमा निकृष्टायामुत्कृष्टादुद्भवन्ति ये ॥ ११८ ॥
प्रतिलोमा विपर्यस्ता व्रात्यास्तत्प्रातिलोमजाः ।
अनुलोमप्रातिलोम्यादान्तरालिकसंज्ञिताः ॥ ११९ ॥

वर्णमात्रानुलोमा ये षट् तेऽपशदसंज्ञिताः ।
240 षडपध्वंसजा ये स्युर्वर्णानां प्रतिलोमजाः ॥ १२० ॥
रजकश्चर्मकारश्च वेनो बुरुड एव च ।
कैवर्तमेदभिल्लाश्च सप्तैता अन्त्यजातयः ॥ १२१ ॥

(इति भगवता यादवप्रकाशेन विरचितायां वैजयन्त्यां
भूमिकाण्डे मनुष्याध्यायः)

ब्राह्मणाध्यायः

ब्राह्मणो मुखजो विप्रो भूदेवो मैत्र एतशः ।
अग्रजन्मा वेदगर्भो बाडबश्च त्रयीपुषः ॥ १ ॥
संस्कारास्तु निषेकाद्याश्श्मशानान्ता द्विजन्मनाम् ।
गर्भाधानं तु यौनं स्यात् प्राजापत्यं च मौलिकम् ॥ २ ॥
5 आधानिकं पुंसवनं पौंस्नमप्यथ गार्भिणम् ।
सीमन्तोन्नयनं नामकर्मामन्त्रणिके समे ॥ ३ ॥
चौलं तु चूडाकरणं क्षुरकर्म तु मुण्डनम् ।
मौण्डिकं भद्राकरणं वपनं परिवापणम् ॥ ४ ॥
सशिखं वपनं तोडं निश्शिखं भिक्षुलोचकम् ।
10 ओष्टितं त्वतिघृष्टं तत् पंचचीरोष्टितं पुनः ॥ ५ ॥
आडिण्डिकं त्रिषु परे मुण्डस्स्यान्मुण्डितोऽशिखः ।
शिखावानवमुण्डस्स्यात् पंचचूडस्तु सारणः ॥ ६ ॥
उपनायस्तूपनय आनायश्च वटूकृतिः ।
ब्रह्मचारी व्रती वर्णी नैष्ठिकस्तु स आश्रमी ॥ ७ ॥
15 गायत्रस्तूपकुर्वाणो वैदिकोऽधीतवेदकः ।
प्राजापत्यः कृतोद्वाहस्स एवौदुंबरायणः ॥ ८ ॥
वर्णिलिंगी लिंगवृत्तिर्निस्स्वाध्यायो निराकृतिः ।
वान्ताशी भोजनार्थं यो गोत्रादि वदति स्वकम् ॥ ९ ॥
उच्छिष्टभोजिनो देवनिवेद्यबलिभोजिनः ।
20 जातिमात्रोपजीवस्तु यस्स स्याद्ब्राह्मणब्रुवः ॥ १० ॥
अजपस्त्वसदध्येता देवाजीवस्तु देवलः ।
अघायवो वधरता विगीताः ख्यातगर्हणाः ॥ ११ ॥

अवगीताश्च हन्ता तु गुरूणां नरकीलकः ।
शिश्विदानो दुराचारो निषिद्धैकरुचिः खरुः ॥ १२
25 त्यक्तात्मा त्यक्तसंवासो ह्यवकीर्णी क्षतव्रतः ।
शाखारण्डोऽन्यशाखास्थो वर्णिलिंग्यादयस्त्रिषु ॥ १३
वानकं तु ब्रह्मचर्यं नियमप्रयमौ व्रते ।
अग्नीन्धनं त्वग्निकार्यमाग्नीध्री चाग्निकारिका ॥ १४
ग्रासे तु पावनी भिक्षा पुष्कलस्तच्चतुष्टयम् ।
30 ते चत्वारो हन्तकारो हन्तकारद्वयं घनः ॥ १५
मुष्ट्यष्टकेऽव्ययं किञ्चित् पुष्कलन्तु तदष्टके ।
पुष्कलानि तु चत्वारि पूर्णपात्रकमस्त्रियाम् ॥ १६
भिक्षाचारः कौकुटिकस्त्रिषु स्यादौर्ध्वरथ्यकः ।
मौञ्जी तु मेखला क्षोणी मौर्वी त्वेकलमात्रिका ॥ १७
35 सौत्री तु घटिनी रंभा दण्डस्तु दमयन्तिका ।
पालाशो दण्ड आषाढो व्रते रांभस्तु वैणवः ॥ १८
बैल्वस्सारस्वतो रौच्यः-पैलवस्त्वौपरोधिकः ।
आश्वत्थस्त्वजितनेमिरौदुंबर उलूखलः ॥ १९
द्विजायनी ब्रह्मसूत्रं सूत्रं यज्ञोपवीतकम् ।
40 पवित्रश्चोपवीतन्तु प्रोद्धृते दक्षिणे भुजे ॥ २०
प्राचीनावीतमन्यस्मिन्निवीतं कण्ठलंबितम् ।
कृष्णाजिनं कार्णिकं स्यात् कृत्तिस्त्री चर्म चाजिनम् ॥ २१
गुरुर्दैशानो बोधानः क्षाणी च ब्राह्मिकोऽथ सः ।
मन्त्रव्याख्यादिनाचार्य उपाध्यायस्तु पाठनात् ॥ २२
45 पाठके तु पठिर्वेदपठिता कल्पपाठकः ।
पाठको धर्मशास्त्राणां धार्मिको धर्ममाणवः ॥ २३

एकतीर्थी सतीर्थ्यैकगुरू सब्रह्मचार्यपि ।
धर्मभ्राता सहाध्यायी शैक्षाः प्राथमकल्पिकाः ॥ २४ ॥
छात्रस्तु शिष्यो मोकः प्राडुपज्ञा ज्ञानमादिमम् ।
50 समौ सिद्धान्तराद्धान्तौ ज्ञात्वारंभ उपक्रमः ॥ २५ ॥
पाठे बिन्दुर्ब्रह्मबिन्दुर्ब्रह्मांजलिरिहांजलिः ।
ऋक् स्त्री साम यजुश्चेति वेदास्ते तु त्रयस्त्रयी ॥ २६ ॥
आथर्वणं पौरोहितं वेदाश्चत्वार एव ते ।
छन्दो ब्रह्म श्रुतिर्वेदोऽप्यथ विद्याश्चतुर्दश ॥ २७ ॥
55 शीक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः ।
ज्योतिषामयनं चेति वेदांगान्यंगिभिस्सह ॥ २८ ॥
मीमांसया पुराणेन स्मृत्या न्यायगणेन च ।
आयुर्वेदो वैद्यशास्त्रं गांधर्वं गीतिशासनम् ॥ २९ ॥
अर्थशास्त्रं दण्डनीतिर्धनुर्वेदोऽस्त्रशासनम् ।
60 चत्वार उपवेदास्ते विद्याश्चाष्टादशोदिताः ॥ ३० ॥
आन्वीक्षिकी तर्कविद्या निरुक्तं पदभंजना ।
नामशास्त्रे निघण्टुर्ना सर्वविद्या कदन्निका ॥ ३१ ॥
अध्यायः कामिकः काव्ये तूछ्वासस्सर्ग इत्यपि ।
प्रपाठकस्त्वाह्निकोऽथो अनुवाकश्च खण्डिका ॥ ३२ ॥
65 ब्राह्मणश्चेत्यवच्छेदा एकग्रन्थस्तु फक्किका ।
विध्यर्थवादमन्त्रास्तु खिलान्युपखिलानि च ॥ ३३ ॥
छन्दोभेदास्तु गायत्रीप्रमुखा एकविंशतिः ।
स्त्रियस्तासु क्रमात् क्लीबे स्युर्गायत्र्यौष्णिहादयः ॥ ३४ ॥
मुखशोभा वेदशालिमुखे चित्रावनिश्च सा ।
70 विधा ह्युच्चारणाभेदास्स्पृष्टसंवृततादयः ॥ ३५ ॥

कादयो व्यञ्जनाः स्त्री वा स्पर्शास्ते मावसानकाः ।
स्त्रियोऽतस्स्था यरलवा ऊष्माणश्शषसास्सहाः ॥ ३६ ॥
विसर्गस्त्वभिनिष्ठानः परे त्रिष्वनुनासिकः ।
नीचोऽनुदात्तो निहत उदात्तस्स्वरितोऽपि च ॥ ३७ ॥
75 वरिवस्या तु शुश्रूषा सेवा भक्तिरुपासना ।
परिचर्याराधनञ्च सेवनञ्च प्रसादनम् ॥ ३८ ॥
पूजार्चना नमस्यार्चा सपर्येज्यार्हणांचनम् ।
नमस्या तु नमस्कारो वन्दनं चाभिवादनम् ॥ ३९ ॥
उपसंग्रहणं पादग्रहणेनाभिवादनम् ।
80 गृहस्थस्स्नातकश्चक्री गृहमेधी गृहीति च ॥ ४० ॥
तस्मिन् सावित्रशालीनौ यः कुसूलेन धान्यभृत् ।
पृथुचित्रः कुण्डधान्यो विघसाशी दिनत्रयी ॥ ४१ ॥
यायावरश्चक्रचरस्सद्यःप्रक्षालितान्नकः ।
परिवेत्ताग्रजेऽनूढे कृतदारपरिग्रहः ॥ ४२ ॥
85 परिवित्तस्तु तज्ज्यायान् परिवित्तिः कुरी च सः ।
भ्रातुर्मृतस्य जायायां संसक्तो दिधिषूपतिः ॥ ४३ ॥
स तु स्यादग्रदिधिषुर्योऽनुजो रमते तया ।
स्यादग्रेदिधुषुश्चासौ स्यादग्रेदिधिषूरपि ॥ ४४ ॥
या ज्येष्ठायामनूढायामूढाग्रेदिधिषूरसौ ।
90 पुनरूढा पुनर्भूस्स्याद्दूर्मिला त्यक्तभर्तृका ॥ ४५ ॥
देवरे विनियुक्ता या यात्यन्यं साभिसारिका ।
प्रसभा निरिणा मीढा निर्लज्जा धर्षणी च सा ॥ ४६ ॥
विस्तीर्णजानुर्विकटा नतजानुस्तु सिंहिका ।
दूषिका क्रोधविवशा पृषता श्वेतबिन्दुका ॥ ४७ ॥

95 अन्यानुरक्ता विगता नष्टा संस्पृष्टमैथुना ।
कन्याप्रसूतिजा जारी हारी नाम्नैव दूषिता ॥ ८८ ॥
हारिता पतितोत्पन्ना कोहली मुखरा भृशम् ।
जडा तु पाली कुब्जा तु दुर्दर्शा कालिकापि च ॥ ८९ ॥
धृष्टा प्रापणिका व्यंगा निघृष्टा कुत्सिता हता ।
100 अरणिर्निस्स्पृहा पालिर्हर्षुला विकला सरुक् ॥ ९० ॥
शरभा तु विशीर्णांगी स्वल्पदेहा मडूषिका ।
द्योता पिंगलकेशाक्षी ऋषभा वृषलक्षणा ॥ ९१ ॥
वर्षकारी स्ववत्पाणिपादा राता विहारिणी ।
सांकारिका तु पित्रादिगृहेष्वग्न्यादिदायिनी ॥ ९२ ॥
105 वैधव्यलक्षणोपेता पतिघ्नी खण्डनापि च ।
सुता त्वजीववत्साया मातुर्या सा विदूषिका ॥ ९३ ॥
विकटाद्यास्तु नोद्वाह्याः कन्यकास्सप्तविंशतिः ।
उपयामः परिणयो विवाहो दारसंग्रहः ॥ ९४ ॥
उद्वाहोपयमौ पाणिग्रहो जंबूलमालिका ।
110 कन्यादाने तु यद्दत्तं यौतकं यौतुकं च तत् ॥ ९५ ॥
गोपाली वर्णके शान्तियात्रावरनिमंत्रणे ।
दौन्दुभी वरयात्रायां धूलिभक्ते तु वार्तिकम् ॥ ९६ ॥
स्यादिन्द्राणीमहे हेलिरुलूलुर्मंगलध्वनिः ।
धोरी हुलिहुली चासौ सैव मंगलमालिका ॥ ९७ ॥
115 क्लीबे स्वस्त्ययनं पूर्णकलशो मंगलाह्निकम् ।
नन्दिकौ तोरणस्तंभौ शुककूटस्तयोस्स्रजि ॥ ९८ ॥
सैव वन्दनमालापि कुहलिः पूगपुष्पिका ।
हस्तसूत्रं प्रतिसरस्तद्बन्धे हस्तकोहलिः ॥ ९९ ॥

तद्ग्रन्थिस्त्ववका धानी करणं हस्तलेपनम् ।
120 उत्सवेषु सुहृद्भिर्यद्बलादाकृष्य गृह्यते ॥ ६० ॥
वस्त्रमाल्यादि तत्पूर्णपात्रं पूर्णानकं च तत् ।
उत्सवो मह उद्धर्ष उद्धवो हर्षवेणुकः ॥ ६१ ॥
क्षणः पर्व च कल्याणं भोज्यं तु जठरोत्सवः ।
मधुपर्कस्तु निष्टंकश्शंखपात्रं तु पाटली ॥ ६२ ॥
125 यज्ञाध्ययनदानानि याजनाध्यापनग्रहाः ।
षट्कर्माणि महायज्ञा देवयज्ञादिपंचकम् ॥ ६३ ॥
निवापः पितृदानं स्यादामपात्रं तु वापिमम् ।
मृतस्नानमपस्नानं श्राद्धन्तु पितृभोजनम् ॥ ६४ ॥
दशाहे श्राद्धमाग्नेयं साज्यमेकादशेऽहनि ।
130 संप्रेषणी द्वादशेऽह्नि मासप्राप्तौ तु मासिकम् ॥ ६५ ॥
एवं त्रिपक्षी षाण्मासी ज्ञेया सांवत्सरीति च ।
गयायां पिण्डदानं यत् पितृकार्यं तदार्यकम् ॥ ६६ ॥
आम्रसेकस्तु यस्तत्र सा चारी सा पितृप्रपा ।
त्रिष्वातिथ्यमतिथ्यर्थं विघसो विप्रशेषितम् ॥ ६७ ॥
135 आवेशिकस्स्यादागन्तुरातिथ्यः प्राहुणोऽतिथिः ।
सूर्योढस्तु स संप्राप्तो यस्सूर्येऽस्तंगतेऽतिथिः ॥ ६८
अथाग्न्याधानमाधेयमाधानं चाग्निसंग्रहः ।
होमस्तु सवनं होत्रं हवनं हुतिराहुतिः ॥ ६९
अग्निहोत्रं नित्यहोमः कुत्सितास्त्वग्निहोत्रिणः ।
140 वीरोज्झप्रमुखास्तत्र वीरोज्झो न जुहोति यः ॥ ७०
अग्निहोत्रं स्वयं वर्षमुत्सन्नाग्निस्तु वीरहा ।
अग्निहोत्रच्छलाद्याचन्नापरो वीरोपजीवकः ॥ ७१

वीरविड्डावको जुह्वत् धनैश्शूद्रसमाहृतैः ।
जातमात्रगृहीताग्निर्यस्स जातारणिर्द्विजः ॥ ७२ ॥
145 यस्यौपासन एवाग्निरेकाग्निः कालिपकश्च सः ।
अग्न्याहितस्त्वाहिताग्निर्नग्नः पुनरनग्निकः ॥ ७३ ॥
पर्याधाताग्रजेऽनग्नौ कृताधानोऽग्रजस्त्वसौ ।
पर्याहितस्तथा न्यायः परियष्टृपरीष्टयोः ॥ ७४ ॥
इज्याशीलो यायजूकस्सोमपीथी तु सोमपः ।
150 सुत्वा त्वभिषवादूर्ध्वं चितवानग्निमग्निचित् ॥ ७५ ॥
यष्टा तु यजुरादेष्टा यजमानश्च होत्ववत् ।
सोमे तु दीक्षितस्सोत्वो यज्वा स्यादिष्टवानसौ ॥ ७६ ॥
सर्ववेदास्स यो यागे दत्तसर्वस्वदक्षिणः ।
यज्ञत्यागी वृथाजातोऽपंचयज्ञो मलिम्लुचः ॥ ७७ ॥
155 याजका भरता यज्ञलिहः कुरव ऋत्विजः ।
यतस्रुचो देवयवो वाघतो वृक्तबर्हिषः ॥ ७८ ॥
अध्वर्यूद्गातृहोतारो ब्रह्मा चेति महर्त्विजः ।
मन्त्राणां दैवतं छन्दो निरुक्तं ब्राह्मणान्यृषीन् ॥ ७९ ॥
कृत्तद्धितादि चाज्ञात्वा यजन्तो यागकण्टकाः ।
160 याजयंतो लैंगधूमाः कौटास्तूभयकारिणः ॥ ८० ॥
प्रसर्पको दृशीकुश्च दर्शनायाध्वरं गतः ।
उपद्रष्टा सदस्यस्स्याच्छान्दसश्श्रोत्रियौ समौ ॥ ८१ ॥
अधीतसांगवेदो यस्सोऽनूचानो युगी गणिः ।
यज्ञो यागोऽध्वरस्स्तोमस्सप्ततन्तुर्मखस्सवः ॥ ८२ ॥
165 सहसानुर्यजः सानुर्वसुनो विश्वहर्यकः ।
पाकयज्ञाः पार्वणाद्या हविर्यज्ञास्त्वसोमकाः ॥ ८३ ॥

पशुबन्धास्तु पशवस्सोमास्सौम्याश्च सोमिनः ।
सवनैस्त्रिभिरेकाहास्तैरावृत्तैरहर्गणाः ॥ ८४ ॥
ते दीक्षितैः कृतास्सत्राण्यहीना याजकैः कृताः ।
170 अहीना द्वादशाहात् प्राक् सत्राण्यूर्ध्वं स तु द्वयः ॥ ८५ ॥
सर्वेऽमी यज्ञक्रतवस्त एवैन्द्राः प्रजागमाः ।
ज्योतिष्टोमश्चतुष्टोमो ज्योतिरानृण्यमित्यपि ॥ ८६ ॥
अग्निष्टोमादयस्संस्थाभेदास्सप्तास्य तन्तवः ।
सौमिकी दीक्षणीयेष्टिर्दीक्षा तु व्रतसंग्रहः ॥ ८७ ॥
175 प्रायणीयोदयनीयौ त्रिष्वाद्येऽन्त्ये च कर्मणि ।
पुरोडाशस्य प्रथने पणिकं प्रथिकैरुके ॥ ८८ ॥
प्रोक्षण्यासादनं दैष्टं पत्नीसन्नहनं स्पशा ।
स्रुचां सम्मार्जनं शुद्धिस्स्रुगासादनमाहुतिः ॥ ८९ ॥
हुतिराज्याधिश्रयणमाज्यावेक्षणमक्षतिः ।
180 स्यादिध्मप्रोक्षणं कार्ष्णश्चैत्यमाज्याधिवासनम् ॥ ९० ॥
वेद्यास्तरणमाप्रासः प्रस्तरस्स्तरणं छादिः ।
त्रैहोत्रं समिदाधानमदितिस्तासु सेचनम् ॥ ९१ ॥
पावकं सोमपानं स्यान्मिश्रकं तु घृतांजनम् ।
उपांशुस्तु प्राणिकस्स्यादन्तर्यामस्त्वपानिकः ॥ ९२ ॥
185 श्यैतनौधसयोर्गानं साम्नोरुपनिमंत्रणम् ।
व्यञ्जनाः पशुसंस्कारास्सामिकं त्वभिमंत्रणम् ॥ ९३ ॥
परंपराकं शमनं प्रोक्षणं च पशोर्वधे ।
अथ यज्ञोपकरणं यजत्रं यजनं च तत् ॥ ९४ ॥
होमधेनुस्त्वग्निहोत्री होमकाष्ठी तु नालिका ।
190 होमधूमस्तु निगणो होमभस्म तु वैष्णुतम् ॥ ९५ ॥

होमेन्धने स्यादिध्मोऽस्त्री पुमानेधस्समित् स्त्रियाम् ।
इन्धनं त्वेध आलाद्यमहोत्रं तु तृणेन्धनम् ॥ ९६ ॥
काष्ठेन्धनन्तु गरहं गोकरीषेन्धनं बुसा ।
यवादि त्वकृतं हव्यं तण्डुलास्तु कृताकृतम् ॥ ९७ ॥
195 अन्नादि कृतमामिक्षा दध्नोष्णं संयुतं पयः ।
पयस्या च क्षीरशरस्तन्मस्तुनि तु वाजिनम् ॥ ९८ ॥
सान्नाय्यं तु दधिक्षीरं पृषदाज्यं पृषातकः ।
पृषतोऽपि च दध्याज्ये पुरोडाशस्तु तृप्रकः ॥ ९९ ॥
हवनी स्रुक् स्रुचो भेदास्स्युर्जुहूरुपभृद्ध्रुवा ।
200 अथाग्निहोत्रहवणी श्रपण्याघारणस्स्रुवः ॥ १०० ॥
चमसोऽस्त्री त्रिपात्राणि वायव्यं सौमिके त्रिषु ।
परिप्लवार्थदण्डा स्रुक् दर्वी तु घृतलेखनी ॥ १०१ ॥
चमूः स्त्री चर्म सुत्यार्थं ग्रावाणस्त्वभ्रयोऽश्मसु ।
विघनो घनो मुद्गरे नरःस्फचोद्धननन्दनाः ॥ १०२ ॥
205 यूपोऽस्त्री संस्कृतस्तंभो होमयूपस्तु शौभिकः ।
यूपावग्निषु पार्श्वस्थावुपस्थाविति संज्ञितौ ॥ १०३ ॥
अग्निष्ठं त्रिषु यूपादि यदग्रेस्संमुखे स्थितम् ।
यूपमध्यं समादानं यूपाग्रं तर्म न स्त्रियाम् ॥ १०४ ॥
कटकेऽस्य चषालोऽस्त्री मूले तूपरमक्षते ।
210 वेष्टनं तु परिव्याणं कुंबा सुगहना वृतिः ॥ १०५ ॥
यूपे सप्तदशारत्नावरत्निर्मेथिकोऽधरः ।
उत्तरेषां क्रमादाख्या उत्रासस्स्वरुमोचनः ॥ १०६ ॥
तथाञ्जनो वैयथितः क्षालनश्शावशीर्षकः ।
सुधन्वो रथगरुतश्शैखालीककरञ्जकौ ॥ १०७ ॥

215 वासवो वैष्णवस्त्वाष्ट्रस्सौम्यो माधुरवेजनौ ।
संघातिकारणिर्नं स्त्री कुशा वरुणकाष्ठिका ॥ १०८ ॥
स्वर्जनी कृष्णविषाणा वेदिर्भूमिः परिष्कृता ।
कुण्डं हवित्री हवनी कुण्डे स्याद्वर्तुले परम् ॥ १०९ ॥
वेदिस्त्रियां चतुष्कोणे त्रिकूटं तु त्रिकोणके ।
220 तस्मिन्नास्तावसंस्तावौ स्तुवते यत्र सामभिः ॥ ११० ॥
चात्वालोऽस्त्री मृत्खनस्स्यादुत्करोऽवकरालयः ।
शस्त्राण्युक्थानि सामानि स्तोत्राणि स्तुतयोऽपि च ॥ १११ ॥
याज्या पुरोनुवाक्या च याज्यापुटमिति द्वयम् ।
सौविष्टकृत्यौ संयाज्ये कूर्चालोलस्फुटी पशुः ॥ ११२ ॥
225 स्त्र्यावृत् क्रमो विधिः कल्प उपकल्पोऽनुकल्पकः ।
पौर्वापर्यं त्वानुपूर्व्यं पर्यायोऽनुक्रमः क्रमः ॥ ११३ ॥
अनुपात्यय आवृत् स्त्री परिपाट्यानुपूर्व्यपि ।
पर्ययस्त्वतिपातस्स्यादतिक्रम उपात्ययः ॥ ११४ ॥
इष्टं यागात्मकं कर्म पूर्तं खातादिकर्माणि ।
230 आचारो वृत्तचारित्रचरित्रचरणानि च ॥ ११५ ॥
वृत्तस्याध्ययनस्यापि संपत्तिर्ब्रह्मवर्चसम् ।
पतनं सत्पथाद्भ्रंशः चर्या त्वीर्यापथस्थितिः ॥ ११६ ॥
हिंसाकर्माभिचारस्स्यान्मूलकर्म तु कार्मणम् ।
वशीकारस्संवननं विकर्माकार्यसेवनम् ॥ ११७ ॥
235 त्यागो दानं वितरणं विश्राणनविसर्जने ।
विहापनं निर्वपणं स्पर्शनं प्रतिपादनम् ॥ ११८ ॥
उत्सर्जनं प्रादेशनमपवर्जनमंहतिः ।
अतोयं सात्त्विकं दानमुदपूर्वं तु पौष्टिकम् ॥ ११९ ॥

आशिषा शान्तिकं दानं काम्यदानं प्रवापणम् ।
240 आशासनेऽर्थना याच्ञा याचनाध्येषणार्दना ॥ १२० ॥
भिक्षा च सनिरस्त्री स्यान्मार्गणा तु गवेषणा ।
पर्येषणा परीच्छा च मृगणान्वेषणा मृगः ॥ १२१ ॥
यस्तु नीलवृषोत्सर्गस्स षण्डो वृषपूतनः ।
उद्वंधवृषभश्चायमापिंगलक इत्यपि ॥ १२२ ॥
245 लोहितस्स्यान्नीलवृषः पुच्छशृंगखुरे सितः ।
यष्टिर्न स्त्री स्त्रियां मीना खनित्री तु विशाखिका ॥ १२३ ॥
वद्धदर्भो वेदयष्टिः कुण्डिका ना कमण्डलुः ।
वैखानसो वनेवासी वानप्रस्थश्च तापसः ॥ १२४ ॥
कापोतो वर्षमात्रस्य स वन्याहारसंग्रहात् ।
250 औदुंबरस्तु षाण्माससंग्रही तुर्यकालभुक् ॥ १२५ ॥
परे त्रिषु तपस्वी स्यात्तापसः पारिकांक्षिकः ।
चतुर्थकालिको भिक्षुर्व्युष्टिरष्टमकालभुक् ॥ १२६ ॥
चान्द्रायणरतश्चन्द्रव्रतिकस्सौमिकश्च सः ।
षष्ठकाली तु बलिको नौसो नक्षत्रकालिकः ॥ १२७ ॥
255 पुष्पाढ्यस्तु स्वयंशीर्णपुष्पमूलफलाशनः ।
भुङ्क्ते पक्षान्तयोरेव यो यवान् स द्विकालिकः ॥ १२८ ॥
शीर्णकश्शीर्णपर्णाशी वृक्षमूली तु मूलिकः ।
भूमौ विपरिवृत्यास्ते यस्स पातालमूलिकः ॥ १२९ ॥
वर्षवातातपानंगे बिभ्रदभ्रावकाशिकः ।
260 शिवव्रती स यो विप्रः पादेनैकेन तिष्ठति ॥ १३० ॥
रुद्रव्रती क्षत्रियश्चेद्वाताहारस्त्वहिव्रती ।
मत्स्यव्रती जलाचारस्तृणशय्यस्तु पर्णशः ॥ १३१ ॥

तन्मूले तु पुमान्हेतुर्गच्छा वांछितराशयः ।
गंडः कपर्दाश्चत्वारस्ते बोध्री पंच तद्वयम् ॥ ३७ ॥
75 विन्दुकोऽस्त्री तद्द्वये तु पणपाणिकपादिकाः ।
क्रमात्ततोऽगजो रुच्यः कार्षिकश्च चतुर्गुणाः ॥ ३८ ॥
कार्षापणः कार्षिकस्स्यात् स षोडशपणः क्वचित् ।
लोहे विंशतिमाषोऽसौ कार्षिके ताम्रिके पणः ॥ ३९ ॥
ताम्रकर्षकृता मुद्रा क्वचित्कार्षापणः पणः ।
80 स एव चाधिकेत्युक्तो धानका तच्चतुष्टयम् ॥ ४० ॥
ता द्वादश सुवर्णोऽस्त्री निष्को दीनार इत्यपि ।
साशीतिपणसाहस्रो दण्ड उत्तमसाहसः ॥ ४१ ॥
त्रसरेणुभिरष्टाभिर्लिक्षा सैव मरीचिका ।
रथरेणुश्च रेणुश्च तास्तिस्रो राजसर्षपः ॥ ४२ ॥
85 घुरणश्च यवाग्रश्च ते त्रयो गौरसर्षपः ।
तेऽष्टौ यवष्षोडश तु यवा माषोऽथवा त्रिभिः ॥ ४३ ॥
यवैर्गुंजा पंच गुंजा माषः कुप्ये तु सप्त ताः ।
रूप्यमाषो द्विगुंजो वा धरणं षोडशैव ते ॥ ४४ ॥
शतमानं तु दशभिर्धरणैः पलमेव च ।
90 माषस्तण्डुलमात्रो वा हेम्नस्तैरष्टभिः पणः ॥ ४५ ॥
निष्कोऽस्त्री विंशतिपणस्तेऽष्ट वा दश वा पलम् ।
यः पंचकृष्णलो माषः कुप्ये वा सप्तकृष्णलः ॥ ४६ ॥
तौ द्वौ माषावर्णिका स्याल्लोहितीकं त्रिमाषकम् ।

शाणो मण्डः पिचूलं च माषास्स्युश्चतुरादयः ॥ ४७ ॥
95 मक्षुणं सप्तमाषं स्यादण्डिका स्याच्चतुर्यवा ।
द्रक्षणं द्रक्षुमं कोलं वटकं चाष्टमाषके ॥ ४८ ॥
तृतीये ध्वानका शाणभागे माषास्तु षोडश ।
सुवर्णोऽक्षः पिचुः पाणिः कर्षोऽस्त्री क्रोडबिंदुके ॥ ४९ ॥
बिडालपादकं हंसपदं ग्रासग्रहं तलम् ।
100 शतमानं तु कर्षे द्वे शुक्तिरष्टमिका न ना ॥ ५० ॥
ते द्वे चतुर्थिका वा स्त्री निकुंच्याज्यपलानि च ।
बिल्वः प्रकुंचं मुष्टिश्च हेम्नोऽक्षे विस्तवारटौ ॥ ५१ ॥
पादिकं ताम्रकर्षं स्यादिन्दुस्स्याद्रजते पले ।
कुरुविस्तः पले हेम्नः प्रसृनोऽस्त्री द्विमुष्टिके ॥ ५२ ॥
105 प्रसृतौ द्वावंजलिः स्यात् कुडपो वाहिकोऽध्युषः ।
तौ द्वौ मान्यष्टमानं च ते द्वे प्रस्थस्स कुप्यके ॥ ५३ ॥
द्वात्रिंशत्पलकोऽन्येषां द्वादशैव पलानि सः ।
चतुष्प्रस्थः पुना राशिर्महोद्रेको बृहाणकः ॥ ५४ ॥
पात्रं शूर्पावरं पिष्टं सेहिका ह्याढकोऽस्त्रियाम् ।
110 कंसं चाथ चतुष्के स्युर्द्रोणोऽस्त्री कलशो घटः ॥ ५५ ॥
अर्मणं नल्वलं शौर्पमुन्मानं तद्वयं पुनः ।
कुंभश्शूर्पोऽस्त्रियां तौ द्वौ गोणी वाहस्तु तद्वयम् ॥ ५६ ॥
तौ द्वौ खारी परे त्वेनां विदुः कुंभीं परे पुनः ।
खारीं कंसयुगेनान्ये मानीं वाहं परे विदुः ॥ ५७ ॥
115 वाहं केचिच्चतुःखारीं खारीभागं च गोणिकाम् ।
वाहं प्रस्थद्वयं केचित् कुंभानां विंशतिर्जटी ॥ ५८ ॥
दश कुम्भाः पांचमिकः कुंभोऽयमिति के चन ।

धारणं तु पलान्यष्टौ हेम्नस्ताम्रस्य सप्ततिः ॥ ५९ ॥
दशान्येषां शतं मानं सार्धे रूप्यपलैस्त्रिभिः ।
120 तुला पलशतं तास्तु दशार्क्षं घटिकोऽस्त्रियाम् ॥ ६० ॥
तौ तु द्वौ शाकटो भारश्शाकटीनश्शलाटवत् ।
भारा दश समं संगं धारभारं च शाकटम् ॥ ६१ ॥
आचितं द्व्याचितं होढं हेलकं समकं समम् ।
वाहितं भारितं चाष्टावृक्षाद्दशगुणाः क्रमात् ॥ ६२ ॥
125 माषश्शाणस्तलं मुष्टिरंजलिः प्रस्थ आढकः ।
द्रोणो गोणी च खारी च क्रमादेतच्चतुर्गुणम् ॥ ६३ ॥
पाय्यं हस्तादिभिर्मानं द्रुवयं कुडबादिभिः ।
पौतवं तुलया तस्य सूत्रं स्याद्रागसूत्रकम् ॥ ६४ ॥

(इति भगवता यादवप्रकाशेन विरचितायां वैजयन्त्यां
सामान्यकाण्डे गणाध्यायः)

धर्मकर्माध्यायः

रूपं तत्त्वं सतत्त्वं च स्वरूपं च सलक्षणम् ।
सहजं निजमाजानं धर्मसर्गौ निसर्गवत् ॥ १ ॥
स्वभावः प्रकृती रीतिरवस्था तु दशा स्थितिः ।
प्रभावः प्रभवन्ती स्यात् प्रभुता प्रभविष्णुता ॥ २ ॥
5 परभागो गुणोत्कर्षः प्राग्भारोऽतिशयो भरः ।
विस्तारो विग्रहो व्यासस्स तु शब्दस्य विस्तरः ॥ ३ ॥
अनायासार्थकं फाण्टं दौर्मत्यं तु करैरकम् ।
विघ्नोऽन्तरायः प्रत्यूहो रोषे त्वादीनवाश्रवौ ॥ ४ ॥
दैर्घ्यमायाम आनाहः परिणाहो विशालता ।
10 वैपरीत्यं विपर्यासो व्यत्ययश्च विपर्ययः ॥ ५ ॥
व्यत्यासो व्यतिहारः स्यादन्तर्गडु निरर्थकम् ।
तत्क्षणं स्यादेकपदं यदृच्छा नियमोज्झितिः ॥ ६ ॥
वण्टो विभागो भागोंऽशः पादस्त्वंशश्चतुर्थकः ।
कला तु षोडशो भागो वारस्त्ववसरः क्षणः ॥ ७ ॥
15 प्रतिकूलानुकूलार्थे अपष्ठुरमपष्ठु च ।
पृष्ठमांसादनं पश्चाद्गतस्यार्थस्य गर्हणम् ॥ ८ ॥
आम्रेडनं झटप्पः स्यात् झंपस्संपातपाटवम् ।
कर्म क्रियाप्यनुष्ठानं तद्भेदा गमनादयः ॥ ९ ॥
यात्रा व्रज्या च गमनं प्रस्थानं च गतिर्गमः ।
20 चक्रावर्तो भ्रमो भ्रांतिर्भ्रमिर्घूर्णिश्च घूर्णनम् ॥ १० ॥
ईहनं शीघ्रगमनं सारणं छद्मना गतिः ।
व्रज्याटाल्या पर्यटनमल्पेऽध्वनि गतागतम् ॥ ११ ॥

सविकारा गतिस्सोरो भेलनं तरणं प्लवः ।
कादाचित्कस्तु भेयोऽसौ क्षेपो लंगनलंघने ॥ १२ ॥
25 निर्याणं स्यान्निर्गमनमंहनं वक्षसा गतिः ।
प्रतिबन्धः प्रतिष्टंभस्सम्बन्धः प्राप्तिरापनम् ॥ १३ ॥
निर्बन्धोऽभिनिवेशः स्यात् प्रवेशोऽन्तरगाहनम् ।
आस्यासनोपवेशश्च निवेशो रचना स्थितिः ॥ १४ ॥
अथाभ्यादानमारंभः प्रक्रमस्स्यादुपक्रमः ।
30 प्रत्युत्क्रमः प्रयोगः स्यादारोहणमभिक्रमः ॥ १५ ॥
आक्रमोऽभिक्रमः क्रान्तिर्व्युत्क्रमस्तूत्क्रमो मृतम् ।
विक्रमश्शौर्यकरणमत्याधानमतिक्रमः ॥ १६ ॥
भूमानं विक्रमः पङ्क्त्यां निर्हारोऽभ्यवकर्षणम् ।
अनुहारोऽनुकारः स्यात् परिहारो निवर्तना ॥ १७ ॥
35 प्रत्याहार उपादानमभिहारस्त्वभिग्रहः ।
समास उपसंहारस्समाहारस्समुच्चयः ॥ १८ ॥
अपहारस्त्वपादानं प्रहारस्त्वभिताडनम् ।
उपलंभस्त्वनुभवो विलंभस्त्वतिसर्जनम् ॥ १९ ॥
विप्रलंभो विसंवादः प्रतिलंभस्तु लंभनम् ।
40 स्वतंत्रवृत्तिर्व्युत्थानमभ्युत्थानं तु गौरवम् ॥ २० ॥
संस्थानं सन्निवेशः स्यादुपस्थानं तु संगतिः ।
धान्योत्क्षेपणमुत्कारः पराकारस्तु धिक्क्रिया ॥ २१ ॥
विकारो विप्रकारः स्यादाकारस्त्विग इंगितम् ।
उपक्रियोपकारः स्यादपकारोऽन्यतः कृतिः ॥ २२ ॥
45 प्रकार इत्थंभावः स्यादपकारोऽन्यपीडनम् ।
प्रत्याख्यानं निराकारः प्रत्यादेशो निरासवत् ॥ २३ ॥

परिणामोऽन्यथाभावस्सन्नामस्त्वन्यथाकृतिः ।
प्रणामः प्रणिपातः स्यादुन्नामस्तुंगतोन्नतिः ॥ २४ ॥
उद्योगोऽस्त्री समुत्थानं विनियोगोऽर्पणं फले ।
50 विधिर्नियोगस्संप्रेष उपयोगः फलक्रिया ॥ २५ ॥
संयोगसंप्रयोगौ संभेदस्सन्निपातसंश्लेषौ ।
संपाते विश्लेषे तु विप्रयोगविरहवियोगाः ॥ २६ ॥
विगमोऽपगमोऽपायो मेलने संगसंगमौ ।
शमथस्तु शमश्शान्तिर्दान्तिस्तु दमथो दमः ॥ २७ ॥
55 बंधनं प्रसितिर्बंधः क्लान्तिस्तु क्लमथः क्लमः ।
परिसर्या परीसारः परिसर्पः परिक्रमः ॥ २८ ॥
लवे विलावो लवनं तेमः स्तेमस्समुन्दनम् ।
प्रतिश्रवः प्रतिख्यातिरपेक्षा प्रतिजागरः ॥ २९ ॥
संयामसंयमौ यामो वियामो वियमो यमः ।
60 संवाहनं मर्दनं स्यात् पर्यवस्था विरोधनम् ॥ ३० ॥
संस्तवः स्यात्परिचय उदजः प्रेषणे पशोः ।
पवनं पवनिष्पावौ जूतिस्तु जवनं जवः ॥ ३१ ॥
प्रेजनं स्यादपसरो रंधनं पचनं पचा ।
क्षयः क्षिया नयो नायो मदो मादः स्रवः स्रवः ॥ ३२ ॥
65 उद्वेग उद्भ्रमः श्रायः श्रयणं प्रमितिः प्रमा ।
स्फातिस्तु वृद्धिः स्फुरणं स्फुलनं क्षेपणं क्षिपा ॥ ३३ ॥
उद्यमो गुरणं श्च्योतिः प्रघारः प्रथनं प्रथा ।
भंगिस्तु व्याकृतिः खेदो निर्वेदो घटना घटा ॥ ३४ ॥
यत्प्रेषणं समाहूय तस्मिन् स्यात् प्रतिशासनम् ।
70 वंचनं त्वतिसंधानं व्यलीकं च प्रतारणम् ॥ ३५ ॥

निष्ठीवोऽस्त्री निष्ठीवनमपि निष्ठेवनं च निष्ठ्यूतिः ।
उपरत्यारत्यपरतिविरतय उपरमण उपरामः ॥ ३६ ॥
संविदागूः प्रतिज्ञास्थाप्यभ्युपायः प्रतिश्रवः ।
अंगीकाराभ्युपगमनियमाश्रवसंश्रवाः ॥ ३७ ॥
75 प्रणीतिः स्यादनुनयः प्रश्रयस्सांत्वनं तथा ।
सपत्राकृतिनिष्पत्राकृती त्वत्यन्तपीडने ॥ ३८ ॥
वर्णनं स्याद्विभजनं प्रवाहस्तु परंपरा ।
श्रन्थनं ग्रन्थनं गुंफस्संदर्भो रचना न ना ॥ ३९ ॥
विधूननं विधुवनं त्यागो हानं च वर्जनम् ।
80 आवर्जनं द्रवक्षेपे निधानं क्षेपणासने ॥ ४० ॥
संमूर्छनं व्यापनं स्यात् विदरस्स्फुटनं भिदा ।
आवर्तनं क्राथनं स्यात् क्वथनं पाकवर्तनम् ॥ ४१ ॥
संवीक्षणं विचयनं लोटनं तु विवेष्टनम् ।
इत्यादयः क्रियाशब्दा लक्ष्या धातुषु लक्षणैः ॥ ४२ ॥

(इति भगवता यादवप्रकाशेन विरचितायां वैजयन्त्यां
सामान्यकाण्डे धर्मकर्माध्यायः)

गुणाध्यायः

गुणो जसुर्द्रव्यपदो द्वौ स्नेहे मार्जमार्जनौ ।
मसृणत्वे तु मारुंगक्रासनौ द्रवणे द्रुतिः ॥ १ ॥
खादीनां तु गुणाश्शब्दस्स्पर्शो रूपं रसः क्रमात् ।
गंधश्चेतीन्द्रियार्थास्ते विषया गोचराश्च ते ॥ २ ॥
5 सत्यं तथ्यमृतं सम्यक् समीचीनं तथार्थवाक् ।
कर्कशे परुषो रूक्षो मठरः खोरणः खरः ॥ ३ ॥
उत्क्षुद्रलोऽथ मसृणे श्लक्ष्णसोमालचिक्कणाः ।
पिच्छिले स्याद्विजविलः कठिने खरटः खटः ॥ ४ ॥
कठोरनिष्ठुरक्रूरदृढदारुणकक्खटाः ।
10 खरश्च सुकुमारे तु कोमलो मृदुलो मृदुः ॥ ५ ॥
शीतले शीकरः शीतस्तुषिकस्सुषिमो जडः ।
समीकस्सोलिकस्सोलस्स्कन्दोलो मेकलस्तलः ॥ ६ ॥
तुषारश्शिशिरस्स्फीतस्सेभ्यस्सीमो हिमोऽपि च ।
उष्णं ज्वलः खरः क्रूरो बालस्तिग्मः कृशश्चुपः ॥ ७ ॥
15 सोमलोऽवह्निको व्यक्तस्तालको जलशीनकः ।
अङ्गारो दहनस्तप्तः प्रुष्वो धूम्रः प्रतापनः ॥ ८ ॥
तीक्ष्णश्चण्डोल्बणप्रोन्द्रकरालिविकरालिनः ।
मन्दोष्णमोष्णं कोष्णश्च कवोष्णश्च कदुष्णवत् ॥ ९ ॥
शुक्ले शुभ्रशुचिश्वेताः पुण्ड्रको धवलोऽर्जुनः ।
20 अवदातस्सितो गौरो विशदश्येतपाण्डराः ॥ १० ॥
काले कृष्णासितश्यामनीलश्यामलमेचकाः ।
रोहिते लोहितो रक्तो हारिद्रे पीतपीतले ॥ ११ ॥

उत्पिशस्तु सितश्यामे हरिणे पाण्डुपाण्डरौ ।
कपोतस्तु कपोताभः पद्मः पीतसितासितः ॥ १२ ॥
25 पिंजो नीलसितश्यामस्सोवालः कृष्णधूमलः ।
सितकाचस्तु पिंगाणः कण्डारस्सितकाचरः ॥ १३ ॥
वरालस्सितपिंगाणः स्तोकपाण्डुस्तु धूसरः ।
कोसलः पाण्डुलः श्यामश्चाटः कृष्णहरिस्सितः ॥ १४ ॥
वलक्षस्तु सितश्यामस्सैराभः श्वेतपीतलः ।
30 सितपीतहरिन्नीलस्तरलो वृद्धपत्रवत् ॥ १५ ॥
रक्तपीतासितश्येते बोलः कारीषभस्मवत् ।
उत्पिशाद्यास्त्वमी मिश्रवर्णाश्शुक्लप्रधानकाः ॥ १६ ॥
शोणोऽरुणश्च संध्याभः श्वेतरक्तस्तु पाटलः ।
मरालोऽल्पः पीतरक्तः पीतरक्तस्तु पिंजरः ॥ १७ ॥
35 बभ्रुः कडारः कपिलो विदग्धो दुष्टरक्तवत् ।
श्यावे तु कपिशः पिंगे पिशंगः कद्रुपिंगलौ ॥ १८ ॥
नीलपीतारुणश्शारो जोणालो नीललोहितः ।
इति लोहितवर्गीणा अथ पीतप्रधानकाः ॥ १९ ॥
सेरालोऽल्पसितः पीतः पेरालः पीतधूमलः ।
40 पीतश्यामल ओरालो गौरः स्यात्पीतलोहितः ॥ २० ॥
कीनाशः पीतहरितो हरितो नीलपीतलः ।
कृष्णवर्ग्याः पुनर्धूम्रधूमलौ कृष्णलोहिते ॥ २१ ॥
पीतकृष्णहरिद्राभः काचरः कृष्णधूमलः ।
कृष्णपीतस्तु काचोऽथ पालाशो हरितो हरित् ॥ २२ ॥
45 तारावतारकिर्मीरशबलैतास्तु चित्रके ।
स चान्योन्यानवष्टंभान्नानावर्णसमुन्नयः ॥ २३ ॥
कर्बुरश्शुक्लहरित आरुः स्यात्कृष्णपिंगलः ।

सितकृष्णस्तु कल्माषः पिंजूषस्सितकाचरः ॥ २४ ॥
कृष्णरक्तसितश्शारः क्रिमिरस्सितलोहितः ।
50 मधुरस्तु रसज्येष्टो गुली स्वादुर्मधूलकः ॥ २५ ॥
अम्लस्तु पाचनश्शुक्तो लवणस्तु पटुस्सरः ।
ऊषणस्तु कटुस्तीक्ष्णस्तिक्तस्तु विसरः कटुः ॥ २६ ॥
कषायोऽस्त्री स्वप्रतिष्ठस्तुवरो मधुरांगकः ।
मधुराम्लौ सलवणौ कटुतिक्तकषायकाः ॥ २७ ॥
55 षट् ते मूलरसाश्शेषा रसका योगयोनयः ।
स्युश्शाडववराश्श्यूषाः श्यूष आसोऽपि च क्रमात् ॥ २८ ॥
अम्लाद्या मधुरोपेतास्साम्लास्तु लवणादयः ।
चाटसस्तीक्ष्णचो रूषश्शुक्तश्च लवणेन तु ॥ २९ ॥
युक्ता वैरवारकः क्षारस्स्वाद्यश्च कटुकादयः ।
60 तिक्तिकः कटुतिक्ते स्यात् कुल्या कटुकषायके ॥ ३० ॥
तैलित्सस्तिक्तकाषाय एवं पंचदश द्विकाः ।
क्रमेण शोणिकः श्यावो रातपं रागशालवः ॥ ३१ ॥
सस्वाद्वम्ला लवणाद्याः सस्वादुलवणेषु तु ।
कटुकादिषु कट्वारो माधुरो मधुकः क्रमात् ॥ ३२ ॥
65 तिक्तकषायौ सस्वादुकटू मधुमधूलिकौ ।
स्वादुतिक्तकषाये तु मधूलोऽमी दश त्रिकाः ॥ ३३ ॥
कट्वाद्यास्साम्ललवणा बोसरः खलुषः क्रमात् ।
कोलश्चाथो साम्लकटू कलुषत्रिखरौ क्रमात् ॥ ३४ ॥
कषायतिक्तौ सोलस्तु शुक्ततिक्तकषायके ।
70 अम्लतिक्तकषायेऽस्मिन् बालाम्लो बालचूनकः ॥ ३५ ॥
कषायतिक्तौ सपटुकटू वेलानवेलजौ ।
कषायतिक्तलवणेऽसोलोऽथैलारसालकः ॥ ३६ ॥

कटुतिक्तकषाये स्यात्तदेवं विंशतिस्त्रिकाः ।
स्वाद्वम्ललवणोपेताः कट्वाद्या मधुमालकः ॥ ३७ ॥
75 मधुबोलस्सोरणश्च क्वचिदंत्यः करोलकः ।
सस्वाद्वम्लकटौ तिक्ते लीसुषः परुषः पुनः ॥ ३८ ॥
कषायेऽत्रैव कलुषाकषायौ जालनः पुनः ।
स्वाद्वम्लतिक्ततुवरे सस्वादुलवणोषणे ॥ ३९ ॥
रसकोपशाडविकौ कषाये वलजः पुनः ।
80 तिक्ते तिक्तपटुस्वादुकषाये फलसोत्थुसौ ॥ ४० ॥
सस्वादुकटुतिक्ते तु कषाये स्यात्कलापकः ।
जलोलकस्साम्लपटुकटौ तिक्ते कषायके ॥ ४१ ॥
तुवरः स्यात्कुवेलश्च खरस्तु लवणे युते ।
अम्लतिक्तकषायैस्तैस्संयुते पलुषः कटौ ॥ ४२ ॥
85 कट्वाद्या लोडकोऽस्त्रचेवं चतुष्का दश पंच च ।
स्वादुमेकं विहायान्ये युक्ताः पंच स्युरोलकः ॥ ४३ ॥
आलुकस्तु विहायाम्लं पटुं हित्वा परांजनः ।
ओलकः कटुकं हित्वा विना तिक्तेन चोलकः ॥ ४४ ॥
समोलकः कषायेण षडेवं पंचका रसाः ।
90 षट्कस्त्वेकष्षड्रसः स्यात् त्रिषष्टिःस्युस्ततो रसाः ॥ ४५ ॥
मधुराम्लादिसंज्ञाश्च शाडवादौ समुन्नयेत् ।
न स्यात्पूर्वरसस्याख्या परावररसाह्वयात् ॥ ४६ ॥
सुरभ्यसुरभी गन्धौ विभिन्नौ तौ च योगतः ।
बहुधा तत्र सुरभिः कटुस्तिक्तः कषायकः ॥ ४७ ॥
95 समष्टिरप्यतोऽन्यो यो गन्धोऽसुरभिरित्यसौ ।
मल्लिकायां स्थितो गन्धो मल्ल्या मल्लश्च सः ॥ ४८ ॥
जात्यां सौमनसो नागकेसरे गन्धसारणः ।

चंपके सुरभिः पद्मे वासनः कुटजे घुणः ॥ ४९ ॥
कस्तूरिकायामामोदः कुंकुमे पलशीनकः ।
100 पारिहाव्यो मरुवके पाटले तृणशोणकः ॥ ५० ॥
चन्दने चन्द्रिकस्साले शोणो गन्धिक उत्पले ।
केतके शोणितं सर्जधूपे सरलशोणिकः ॥ ५१ ॥
वकुले स्यात् परिमलो वलनोऽगरुधूपके ।
सहकारे सरलिको गुग्गुलौ त्ववलोलुकः ॥ ५२ ॥
105 कुन्दोपरालो मदने दुलो जम्बीर(के स्थितः) ।
मल्लयां (स्थितस्तु) खवुकः कर्पूरे मुखवासनः ॥ ५३ ॥
आ ये समशनोऽशोके सुरवःतिलके कुलः ।
गात्रे गन्धो गन्धके तु गन्धिकः पित्तले लसः ॥ ५४ ॥
गुदवायौ तु दुर्गन्धः किट्टे कोलः कफे घनः ।
110 मत्स्यत्वच्यामिषो निंबे तिक्तको गोमुखे सणिः ॥ ५५ ॥
उद्दंशे देहलिर्गोविण्मूत्रयोर्मुकमुर्मुरौ ।
शुक्ले मांसिर्मदे रूक्षो मूत्रिते त्वन्धमेहलः ॥ ५६ ॥
स्नेहदोषे मेचटिको गूधे स्थालिकवैणिकौ ।
चिस्रो यकृति पूये तु पूतिर्मूत्रे तु मेहलः ॥ ५७ ॥
115 दुष्टव्रणे तु कथितो रुधिरे त्वाममांसकः ।
गन्धशब्दास्त्वमी योज्यास्साम्याद्द्रव्यान्तरेष्वपि ॥ ५८ ॥
एते सत्यादयश्शब्दाश्शब्दस्पर्शादिगोचराः ।
उक्तलिङ्गा गुणार्थास्ते सर्वेऽपि गुणिनि त्रिषु ॥ ५९ ॥

(इति भगवता यादवप्रकाशेन विरचितायां वैजयन्त्यां
सामान्यकाण्डे गुणाध्यायः)

अर्थवल्लिङ्गाध्यायः

गुणयुक्तं क्रियायुक्तं द्रव्ययुक्तं च वक्ति यः ।
स शब्दो वाच्यवल्लिङ्गो बालो वक्ता धनी यथा ॥ १ ॥
बालो डिंभोऽर्भकश्शावः कुमारो दारकः शिशुः ।
अप्युत्तानशयो वत्सः स्तनपस्तु स्तनन्धयः ॥ २ ॥
5 वटुर्माणवकोऽथ स्याद्वयस्थस्तरुणो युवा ।
जीनो जीर्णो वृद्धवयाः प्रवयाः स्थविरो जरन् ॥ ३ ॥
वर्षीयान् दशमी ज्यायान् कनिष्ठोऽवरजोऽनुजः ।
जघन्यजो यवीयांश्च पूर्वजे त्वग्रियोऽग्रजः ॥ ४ ॥
पितुर्विभक्तस्संसृष्टी भ्रात्रार्थैनैकतां गतः ।
10 पृश्निः किरातोऽल्पतनुर्दुर्बलस्तु कृशस्तनुः ॥ ५ ॥
पीनस्तु पीवरः पीवा प्रबलो मांसलोंऽसलः ।
सिंहसंहननः स्वंगस्तुण्डिरुन्नतनाभिकः ॥ ६ ॥
पिचण्डिलस्तूदरिलस्तुन्दिलस्तुन्दितुन्दिकौ ।
वलिनो वलिभो बिभ्रद्वली राजीस्तु राजिलः ॥ ७ ॥
15 एवं सिरालमणिलौ प्रलंबाण्डस्तु मुष्करः ।
केशवः केशिकः केशी रोमशो लोमशस्समौ ॥ ८ ॥
श्मश्रुलो जटिलश्चैवं दन्तुरः स्यादुदग्रदन् ।
किरिभस्तद्विपर्यासे मिर्मिरः स्तब्धलोचनः ॥ ९ ॥
आसीन उपविष्टस्स्यादूर्ध्वज्ञुस्तूर्ध्वजानुकः ।
20 संज्ञुस्संहतजानुस्स्यात् प्रज्ञुः प्रगतजानुकः ॥ १० ॥
विकलांगस्तु पोगण्डो गड्डुले न्युब्जकुब्जकौ ।
खुरणास्स्यात् खुरणसो नःक्षुद्रः क्षुद्रनासिकः ॥ ११ ॥

खरणास्स्यान् खरणसो विग्रो विगननासिकः ।
नतनासेऽवटीटस्स्यादवनाटोऽप्यवभ्रटः ॥ १२ ॥
25 केकरो वलिरोऽनेडमूकोऽन्धः काण एकदृक् ।
एडस्तु बधिरः कण्व एडमूकस्त्ववाक्छ्रुतिः ॥ १३ ॥
अनेडमूकस्तु जडो जलो मूकः कलोऽप्यवाक् ।
पंगुः श्रोणे खंजकोलौ खोडेऽथ कुकरे कुणिः ॥ १४ ॥
शिपिविष्टस्तु दुश्चर्मा दुर्बालश्च ह्रिनग्नकः ।
30 क्षपणश्रमणौ नग्नो नग्नाटश्च दिगंबरः ॥ १५ ॥
आजीवो जीवको जैनो निर्ग्रन्थो मलवार्यपि ।
हृदयालुस्सुहृदयो महेच्छस्तु महाशयः ॥ १६ ॥
प्रौढः प्रगल्भः प्रतिभायुक्तोऽन्यस्त्वपगल्भकः ।
धृष्टो धृष्णुर्वियातश्च शालीनस्तु विपर्यये ॥ १७ ॥
35 अधीरे कातरत्रस्नुभीरुभीरुकभीलुकाः ।
दरिते भीतचकितत्रस्नाः स्निग्धस्तु वत्सलः ॥ १८ ॥
प्रवीणोऽभिजनोऽभिज्ञो विज्ञो वैज्ञानिकः कृती ।
कृतकृत्यः कृतमुखो निष्णातो दक्षशिक्षितौ ॥ १९ ॥
अग्राम्ये सरलोदारविदग्धच्छेकदक्षिणाः ।
40 गर्विते स्तब्ध उद्ग्रीवो वाहो धीररस इत्यपि ॥ २० ॥
मूर्खे त्वनेडो देवानांप्रियो यो नामवर्जितः ।
अपि वैधेयमूढाज्ञा मातृशिष्टयथोद्गतौ ॥ २१ ॥
नीचे तु हीनापशदपामरेतरबर्बराः ।
नैकृतस्स्यान्नैकृतिकश्शठः कौनृतिकोऽनृजुः ॥ २२ ॥
45 कुहकस्स्यात्कापटिको दाण्डाजिनिकजालिकौ ।
ढौण्डुको ढण्डुकश्चाथ कोलाकोऽर्थेरतस्सदा ॥ २३ ॥

क्रूरो नृशंसोऽप्यदये धूर्ते व्यंसकवञ्चकौ ।
कौक्कुटो मायिको मायी मायावी प्रातिहारिकः ॥ २४ ॥
ना दुर्जनः खलः कर्णेजपः पिशुनसूचकौ ।
50 कद्वदः कुत्सितोऽत्यर्थं परिभोक्ता गुरुस्वभृत् ॥ २५ ॥
नीलीरागः स्थिरप्रेमा हरिद्रारागकः पुनः ।
अस्थिरप्रेम्णि गोष्ठश्वः पुनस्स्थाने स्थितो द्विषन् ॥ २६ ॥
अन्वेष्टा स्यादनुपदी चिद्रूपस्तु सुमानसः ।
स्वच्छन्दोऽपावृतस्स्वैरी स्वतंत्रो निरवग्रहः ॥ २७ ॥
55 परच्छंदः पराधीनः परवान् परतंत्रकः ।
निघ्नः प्रसव्य आयत्तो विधेयो गृह्यको वशः ॥ २८ ॥
अहंयुस्स्यादहंकारी शुभंयुस्तु शुभान्वितः ।
सूक्ष्मदर्शी कुशाग्रीयधीर्विलक्षस्सविस्मयः ॥ २९ ॥
यद्भविष्यो दैवपरो यद्वदः स्यादनुत्तरः ।
60 परीक्षकः कारणिक उद्युक्ते प्रसितोत्सुकौ ॥ ३० ॥
अन्तर्वाणिश्शास्त्रवित्स्यादविनीतस्समुद्धतः ।
प्रत्युत्पन्नमतिस्तु स्यात्तत्कालोत्पन्नधीर्नरः ॥ ३१ ॥
प्रणेयः प्रश्रितो वश्यो विधेयो निभृतो यतः ।
क्रोधनः कोपनोऽमर्षी चण्डस्तु भृशकोपनः ॥ ३२ ॥
65 सहिष्णुस्सहनस्सोढा तितिक्षुः क्षमिता क्षमी ।
हर्षमाणो विकुर्वाणः प्रमना मुदितस्समुत् ॥ ३३ ॥
दुर्मना विमना अन्तर्मनास्स्यादुत्क उन्मनाः ।
दोषदर्शी पुरोभागी कमनः कामनोऽनुकः ॥ ३४ ॥
कामुकः कमिताभीकः कम्रः कामयिताभिकः ।
70 तृष्णक्कु गर्धनो गृध्नुः लिप्सुर्लुब्धोऽभिलाषुकः ॥ ३५ ॥

लोलुपे लोलुभो लोलो लंपटो लालसोऽपि च ।
बुभुक्षुः क्षुधितश्श्रान्तो जिघत्सुरशनायितः ॥ ३६ ॥
पिपासितस्तु तृषितः पिपासुस्तर्षितस्सतृट् ।
मत्ते शौंडोत्कटक्षीबाश्श्राद्धः श्रद्धालुरास्तिकः ॥ ३७ ॥
75 नास्तिकस्तद्विपर्यासे गृहयालुर्ग्रहीतरि ।
संशयालुस्तु संदेग्धा पतयालुस्तु पातुकः ॥ ३८ ॥
दयालुः स्यात्कारुणिकोऽनुकंप्यः कारुणस्समौ ।
स्वप्नक् शयालुर्निद्रालुर्निद्राणश्शयितस्समाः ॥ ३९ ॥
लज्जाशीलोऽपत्रपिष्णुर्वर्तिष्णुर्वर्त्तनस्समौ ।
80 निराकरिष्णुः क्षिप्नुस्स्यात् वर्धिष्णुर्वर्धनस्समौ ॥ ४० ॥
उन्मदिष्णुस्तु सोन्मादोऽलङ्करिष्णुस्तु मण्डनः ।
भूष्णुर्भविष्णुर्भविता प्रजनिष्णुस्तु भावुकः ॥ ४१ ॥
उत्पतिष्णुस्तूत्पतिता रोचिष्णू रोचनस्समौ ।
स्थास्नुस्तु स्थायुकस्स्थायी शरारुर्हिंस्रघातुकौ ॥ ४२ ॥
85 वेदिता विदुरो विन्दुस्सान्द्रस्स्निग्धस्तु मेदुरः ।
आशंसुराशंसितरि वन्दारुरभिवादकः ॥ ४३ ॥
जागरूको जागरिता श्लक्ष्णवाक् तु प्रियंवदः ।
शक्लो मधुरवाक् चाथ रूक्षो लूक्षो विपर्यये ॥ ४४ ॥
वदो वदावदो वक्ता वागीशो वाक्पतिस्समौ ।
90 वाचोयुक्तिपटुर्वाग्मी वावदूकश्च दक्षवाक् ॥ ४५ ॥
जल्पाकस्त्वपि वाचालो वाचाटो बहुगर्ह्यवाक् ।
मुखरो दुर्मुखोऽबद्धमुखो मातृमुखोऽपि च ॥ ४६ ॥
कद्वदो गर्ह्यवादी स्याद्धोहलोऽस्फुटभाषणः ।
अधरो दीनवादी स्यात्सम्मुखः प्रतिभानवाक् ॥ ४७ ॥

95 नानीकरस्तु नानीकवाक् स्वनोऽशोभनस्वरः ।
कुवदे कुचरश्शब्दकारे रवणशब्दनौ ॥ ४८ ॥
व्युत्पन्नः प्रहतः क्षुण्णो वचनेस्थित आश्रवः ।
परान्नः परपिण्डादः परजातपरैधितौ ॥ ४९ ॥
सर्वान्नीनस्सर्वभक्ष आमिषादी तु शौल्किकः ।
100 आत्मंभरिः कुक्षिंभरिः भक्षको घस्मरोऽद्मरः ॥ ५० ॥
आद्यूनस्स्यादौदरिको विमुक्तो विजिगीषया ।
ह्रीणो ह्रीतो लज्जितस्स्यादन्वेष्टा तीक्ष्णसाधनैः ॥ ५१ ॥
अद्रुते धीरविस्रब्धावुत्तालः कर्मणि द्रुतः ।
कुडुंबव्यापृते तु द्वावभ्यागारिक उत्थितः ॥ ५२ ॥
105 दीर्घदृष्टिस्तु यो दूरादर्थानर्थौ निरीक्षते ।
आमुष्यायण उत्पन्नः प्रख्यातकुलतः पितुः ॥ ५३ ॥
वैरंगिको विरागार्हे उत्पश्यः पुनरुन्मुखः ।
चतुरः पेशलो दक्षस्सूत्थानः पटुरुष्णकः ॥ ५४ ॥
मन्दस्तुन्दपरिमृज आलस्यश्शीतकोऽलसः ।
110 क्षेमंकरोऽरिष्टतातिश्शिवतातिश्शिवंकरः ॥ ५५ ॥
लक्ष्मीवान् लक्ष्मणश्श्रीलो महामात्रोऽधिकर्द्धिकः ।
उदारोदीर्णधन्यास्तु महात्मा सुकृतीति च ॥ ५६ ॥
समृद्धस्स्यादुपचितो धनवानस्तिमान् समौ ।
आढ्यस्त्विभ्यो धनी नेता त्वीश्वरो नायकः प्रभुः ॥ ५७ ॥
115 अधिभूरधिपोऽधीश ईशिताधिपतिः पतिः ।
ईशः परिबृढस्स्वामी स्थूललक्षो बहुव्यये ॥ ५८ ॥
कदर्यें कृपणक्षुद्रकिंपचानमितंपचाः ।
आशयश्चाप्यदाता च दरिद्रे स्यादकिंचनः ॥ ५९ ॥

अपि दुस्स्थक्रूरदीननीचदुर्गतदुर्विधाः ।
120 मार्गणस्स्याद्याचनको याचकोऽर्थी वनीपकः ॥ ६० ॥
आर्यः कौलेयको जात्यः कुलीनः कुलजोऽभिजः ।
जगत्रसचरप्राणमिषदिंगच्च जंगमम् ॥ ६१ ॥
स्थावरं तस्थिवच्चान्यदुभयं तु चराचरम् ।
वा क्ली प्रधानं प्रमुखप्रबर्हप्रवरोत्तमाः ॥ ६२ ॥
125 मुख्यवर्यवरेण्याश्च प्रवेकोऽनपरार्थ्यवत् ।
श्रेष्ठः प्राग्रहरं प्राग्रमग्रमग्रीयमग्रियम् ॥ ६३ ॥
परार्थ्यं ग्रामणीः स्पर्ध्यं जात्यं च वरमग्रणीः ।
उपाग्रस्तु गुणः पुंसि क्लीबे स्यादुपसर्जनम् ॥ ६४ ॥
तत्तु स्यादासेचनकं न तृप्तिर्यस्य दर्शनात् ।
130 पवित्रं प्रयतं पूतं मेध्यं शुद्धं शुचीति च ॥ ६५ ॥
निर्णिक्तं शोधितं मृष्टं निश्शोध्यमनवस्करम् ।
विमले वीध्रं मलिने द्वौ कच्चरमलीमसौ ॥ ६६ ॥
आत्तगन्धोऽभिभूतस्स्यात् बद्धे कीलितसंयतौ ।
आक्षिप्तो हतकः क्षिप्तो विक्लवो विह्वलस्समौ ॥ ६७ ॥
135 विहस्तो व्याकुलो व्यग्रश्चले संकुसुकोऽस्थिरः ।
व्यसनार्त्तस्तूपरक्त आततायी वधोद्यतः ॥ ६८ ॥
शत्रूणां तापयितरि द्विषंतपपरंतपौ ।
द्वेष्यस्त्वक्षिगतोऽनिष्टो दुर्भगोऽपि च विप्रिये ॥ ६९ ॥
चक्षुष्यस्सुभगः कान्तो दयितो वल्लभः प्रियः ।
140 गेहेनर्दी गृहेशूरः पिण्डीशूरो गृहे प्रभुः ॥ ७० ॥
वध्यो विष्यो विषेण स्यात् मुसल्यो मुसलेन च ।
निष्कासितोऽपकृष्टस्स्यादपध्वस्तस्तु धिक्कृतः ॥ ७१ ॥

कर्मक्षमोऽलंकर्मीणः कर्मशूरस्तु कर्मठः ।
कार्मस्तु कर्मशीलः स्याद्दीर्घसूत्रश्चिरक्रियः ॥ ७२ ॥
145 कर्मण्यकृत् कर्मकरः कर्मकारस्तु तत्क्रियः ।
निर्वार्यः कार्यकृद्यः स्याद्युक्तस्सन् सत्त्वसंपदा ॥ ७३ ॥
क्रियावान् कर्मवान् कर्मी कुण्ठो मन्दः क्रियासु यः ।
स आयश्शूलिको यस्स्यादन्वेष्टा तीक्ष्णसाधनैः ॥ ७४ ॥
गर्ह्योऽपकृष्टचेलार्वरेफयाप्याधमावमाः ।
150 प्रतिकृष्टावद्यखेटनिकृष्टाणककुत्सिताः ॥ ७५ ॥
जघन्यं तु कुपूयं स्यादसारं लघु फल्गु च ।
पुंस्यादिराद्यपौरस्त्यप्रथमप्रमुखादिमाः ॥ ७६ ॥
अग्र्यं त्वग्रिममग्रस्थं मध्यमीयं तु मध्यमम् ।
अन्त्ये जघन्यपाश्चात्यचरमान्तिमपश्चिमाः ॥ ७७ ॥
155 करंबः कंबरो मिश्रः संपृक्तः खचितस्समाः ।
चलाचलं तु प्रचलं चपलं चंचलं चलम् ॥ ७८ ॥
चिकुरं चटुलङ्कंप्रं पारिप्लवपरिप्लवौ ।
स्थास्न्वेकरूपं कूटस्थं स्थेयान् स्थेष्ठोऽप्यतिस्थिरे ॥ ७९ ॥
विशालमुरु विस्तीर्णं विपुलं पृथुलं पृथु ।
160 स्फारं भद्रं बृहद्व्यूढमुदूढं बहुलं बहु ॥ ८० ॥
प्रांशूच्चमुन्नतं तुङ्गमुदग्रं तूच्छ्रिताग्रकम् ।
न्यङ्नीचह्रस्वखर्वास्तु वामने दीर्घमायते ॥ ८१ ॥
विशालं विकरालं स्याद्विकटं च विशङ्कटम् ।
वर्त्तुलं निस्तलं वृत्तं सुवृत्तं परिमण्डलम् ॥ ८२ ॥
165 चिपिटः पिच्छितो व्यूढे स्थपुटं विषमोन्नतम् ।
आनतं तु नतं नम्रं बन्धुरं तून्नतानतम् ॥ ८३ ॥

क्षीणं क्षामं विलिष्टं स्यात् स्थूलं तु बहलं दृढम् ।
प्रभूतं प्रचुरं प्राज्यं बहलं बहुलं बहु ॥ ८४ ॥
अदभ्रमधिकं भूरि भूयिष्ठं पुरुहं पुरु ।
170 समग्रं सकलं सर्वं समस्तं निखिलाखिले ॥ ८५ ॥
अखण्डकृत्स्ननिश्शेषपूर्णविश्वसमानि च ।
खण्डनेमोनविकलाः पूर्णे भरितपूरितौ ॥ ८६ ॥
संपूर्णश्चाथ वशिकं शून्यं तुच्छश्च रिक्तकम् ।
पुराणे प्राक्तनप्रत्नपुरातनचिरन्तनाः ॥ ८७ ॥
175 नूत्ने त्वभिनवो नव्यो नवीनो नूतनो नवः ।
शाश्वते त्वमृतो नित्यस्सनातनसदाननौ ॥ ८८ ॥
सद्यस्तने तु साद्यस्कप्रत्यग्राभ्यग्रशारदाः ।
ह्यस्तनश्वस्तनाद्याः स्युर्ह्यआदिस्थेषु वस्तुषु ॥ ८९ ॥
कालवाच्यव्ययेभ्यः स्यादन्येभ्योऽपि तथा तनः ।
180 न्यक् स्यादधोमुखं न्युब्जमुदुब्जोत्तानमुन्मुखे ॥ ९० ॥
उदक्प्रत्यक् परागर्वाक् प्राक्च तिर्यगवागपाक् ।
विष्वक्चैवमुदीचीनप्रमुखाः स्युर्यथाक्रमम् ॥ ९१ ॥
दिग्देशकालवचनमुदगादिकमव्ययम् ।
दिग्देशकालसंबन्धिपदार्थेष्वभिधेयवत् ॥ ९२ ॥
185 यस्सहांचति सध्र्यङ् स विष्वद्र्यङ् विष्वगंचति ।
देवानंचति देवद्र्यङ् सध्रीचीनादि चोन्नयेत् ॥ ९३ ॥
अविलंबितमुच्चण्डं संशितं तु सुतेजितम् ।
उत्पिञ्जलं समुत्पिञ्जमिति द्वे भृशमाकुले ॥ ९४ ॥
अनादृते त्ववज्ञातमवतीर्णापहस्तितम् ।
190 चलितप्रेंखिताधूतवेल्लिताकंपिता धुते ॥ ९५ ॥

रुचिते हृद्यलषितवांछितेष्टेडितेहिताः ।
संवीतं स्याद्वलयितं वेष्टितं रुद्धमावृतम् ॥ ९६ ॥
नुन्नास्तनुत्तप्रहितक्षिप्तविद्धास्स्युरीरिते ।
बद्धे सन्नाहितं नद्धं मुद्रितं सन्दितं सितम् ॥ ९७ ॥
195 सन्तापितं धूपायितं दूनं तप्तश्च धूपिते ।
मार्गिते मृगितान्विष्टावन्वेषितगवेषितौ ॥ ९८ ॥
लब्धाप्तासादितप्राप्तभूतविन्नास्तु भाविते ।
प्रयत्ते मुदितप्रीतहृष्टास्सुहिततृप्तवत् ॥ ९९ ॥
आबर्हिते तूद्बृहितोन्मूलितोत्पाटितोद्धृताः ।
200 ऊतगोपायितत्रातत्राणगुप्तास्तु रक्षिते ॥ १०० ॥
मनिते विदितज्ञातौ बुधिते बोधबुद्धवत् ।
त्यक्ते तु विधुतोत्सृष्टहीनधूतसमुज्झिताः ॥ १०१ ॥
कृत्ते लूनच्छिन्नदातवृक्णच्छातच्छितार्दिताः ।
स्रस्ते भ्रष्टध्वस्तपन्नगलितस्कन्नविच्युताः ॥ १०२ ॥
205 प्रेरवोलितं तरलितं लुलितं प्रेंखितश्च तत् ।
भजमाने प्राप्तयुक्तन्याय्यान्यौपयिकोचिते ॥ १०३ ॥
न्यस्ते त्वारोपितोऽध्यस्तो निहितोऽपहितो हितः ।
उपसन्नं तूपनतमुपप्राप्तमुपस्थितम् ॥ १०४ ॥
शुश्रूषितं परिवसितमुपासितश्च वरिवसितश्च समम् ।
210 अपचायितं नमसितं नमस्यितं सममपचितश्च ॥ १०५ ॥
पणितपणायितपनिताः पनायितस्तुतनुतेडिताश्शस्ते ।
वर्णितगीर्णौ च तथा संगीर्णोपश्रुतौ प्रतिज्ञाते ॥ १०६ ॥
उन्नोत्ततिमितक्लिन्नस्नपितार्द्राणि सार्द्रवत् ।
स्युः प्रत्यवसिते प्सातजग्धान्नाशितखादिताः ॥ १०७ ॥

215 ग्रस्तग्लस्ताभ्यवहृतभुक्तभक्षितजक्षिताः ।
परिक्षिप्तं तु निवृतं निदिग्धोपचितौ समौ ॥ १०८ ॥
प्राप्ते प्रणिहितापन्नौ विस्मृतोऽन्तर्गतेऽस्मृते ।
संगूढं स्यात् संकलितं स्यन्नं रीणं स्नुतं स्रुतम् ॥ १०९ ॥
अवरीणो धिक्कृतस्स्याद्दृब्धे ग्रथितमुद्रितौ ।
220 संकीर्णे संकुलाकीर्णौ विस्तृते विसृतं ततम् ॥ ११० ॥
सिद्धे निर्वृत्तनिष्पन्नौ भिन्ने भेदितदारितौ ।
वेधितच्छिदितौ विद्धे तष्टत्वष्टौ तनूकृते ॥ १११ ॥
ऊतं स्यूतमुतं तन्तुसन्तते प्रार्थितेऽर्दितम् ।
उद्धृतं समुदस्तं स्यान्मर्मस्पृक् स्यादरुन्तुदम् ॥ ११२ ॥
225 गुण्डितं रूषिते क्लिष्टे क्लेशितं पूजितेऽञ्चितम् ।
ज्ञप्तं तु ज्ञपिते हन्नं गूने मीढं तु मूत्रिते ॥ ११३ ॥
पुषिते पुष्टमुद्गूर्णोद्यत(यत्ताः प्रयत्नवान्) ।
दमिते दान्तं शमिते शान्तमुद्वान्तमुद्गते ॥ ११४ ॥
पन्नं प्रपतिते सन्नं लिप्टे तुन्नं तु पीडिते ।
230 निष्पक्वे क्वथितं सोढे क्षान्तं निचितमाचिते ॥ ११५ ॥
मुषिते लुण्ठितं यस्ते निसृष्टं वृद्धमेधिते ।
काचितं शिक्यिते दिश्यं दिग्भवेऽभ्रभवेऽभ्रियम् ॥ ११६ ॥
यज्ञियं यज्ञकर्मार्हे चक्षुष्यं चक्षुषे हितम् ।
तत्तद्गात्रभवे दन्त्यं हस्त्यमोष्ठ्यमितीदृशाः ॥ ११७ ॥
235 पुंसः पौंस्नम् स्त्रियाः स्त्रैणमग्नेराग्नेयमित्यपि ।
दण्डवान् दण्डिको दण्डीत्येवं नेयमदन्ततः ॥ ११८ ॥
व्रीहिणो व्रीहिमन्तस्स्युर्यवमन्तो यवान्विताः ।
निर्जने स्थान एकान्तं विविक्तं विजनं तथा ॥ ११९ ॥

छन्नं गुह्यं निश्शलाकं रहः क्लीबोऽथवाव्ययम् ।
240 गुह्यं रहस्यमित्येतावप्रकाश्येऽपि वस्तुनि ॥ १२० ॥
समं समानं सविधं सदृक्षं सदृशं सदृक् ।
तुल्यं सवर्णं शब्देभ्यः परे स्युः प्रतिमा प्रभा ॥ १२१ ॥
आभा प्रख्योपमाभिख्या प्रकारस्सन्निभं निभम् ।
निकाशाद्याश्च साम्यार्थास्समे स्युश्शब्दतः पराः ॥ १२२ ॥
245 परस्परं स्यादन्योऽन्यमितरेतरमित्यपि ।
वक्रं वृजिनमाविद्धमूर्मिमत् कुञ्चितं नतम् ॥ १२३ ॥
अरालं कुटिलं भुग्नमवक्रे प्रगुणोऽप्यृजुः ।
सत्वरं त्वरितं तूर्णमरं क्षिप्रं लघु द्रुतम् ॥ १२४ ॥
अजिरं चपलं शीघ्रमविलंबितमाशु च ।
250 विरलं तनु विश्लिष्टमघनं तलिनं तथा ॥ १२५ ॥
निबिडं निबिरीसं स्यात् घनं सान्द्रं निरंतरम् ।
विकटं तु विरूपं स्यात् संबाधस्संकटस्समौ ॥ १२६ ॥
प्रतीपं प्रतिकूलं स्यादनुकूलं विपर्यये ।
अनुलोममनूचीनं प्रतिलोमं विपर्यये ॥ १२७ ॥
255 अव्ययीभावोऽनुपदमन्वगन्वक्षमित्यपि ।
एकसर्गोऽनन्यवृत्तिरेकाग्रैकायनैकगम् ॥ १२८ ॥
अप्येकतान एकान्तोऽप्येकायनगतोऽपि च ।
साधारणं तु सामान्यं मोघं व्यर्थमपार्थकम् ॥ १२९ ॥
नित्यानवरताजस्रसतताश्रांतसंतताः ।
260 अनारतं चाविरतमसक्तं चानिशं नपुम् ॥ १३० ॥
अतिमात्रेऽतिमर्यादमतिवेलातिमानकम् ।
भृशमत्यन्तमत्यर्थमधिकोद्गाढनिर्भरम् ॥ १३१ ॥

तीव्रं तु गाढमेकान्तं नितान्तं दृढबाढवत् ।
वशोऽनर्गलमुद्दाममुच्छृंखलमयन्त्रितम् ॥ १३२ ॥
265 परोक्षेऽतीन्द्रियोऽध्यक्षप्रत्यक्षौ तु समक्षवत् ।
सकाशं स्यात् सन्निहिते समन्तं तु समन्तिकम् ॥ १३३ ॥
प्रकाशं प्रकटं स्पष्टमुल्बणं विशदं स्फुटम् ।
सुन्दरं रुचिरं रुच्यं मनोज्ञं मञ्जु मञ्जुलम् ॥ १३४ ॥
शोभनं सुषमं चारु हृद्यं चौक्षं मनोहरम् ।
270 न्युंखं हारि प्रियं साधु लडहं च मनोरमम् ॥ १३५ ॥
अल्पं सूक्ष्ममणु स्तोकं दभ्रं दहरमर्हकम् ।
किञ्चिन्मात्रम्मितं दभ्रं श्लक्ष्णं तनु तु पेलवम् ॥ १३६ ॥
अतिरिक्तोऽतिशयितो दृढस्समधिकोऽधिकम् ।
चतुरं पेशलं दक्षं कटु तूल्बणमुत्कटम् ॥ १३७ ॥
275 विशेषणं क्रियायास्स्युस्समाद्याः क्ली च तद्यथा ।
पुत्रं धत्ते सममिति नित्याद्यास्तु गुणस्य च ॥ १३८ ॥
नित्यं धत्ते सितो नित्यमिति द्रव्ये पुनस्त्रिषु ।
उभयेऽपि यथा धत्ते समो नित्योऽर्थवानिति ॥ १३९ ॥
प्रथमं चरमं पूर्वमित्याद्यप्येवमुन्नयेत् ।
280 समीपनिकटाभ्यग्राभ्यर्णाभ्याशान्तिमा इव ॥ १४० ॥
सदेशसविधासन्नसन्निकृष्टसवेशवत् ।
उपकण्ठसमर्यादसवेधानि सनीडकम् ॥ १४१ ॥
उपान्ते विप्रकृष्टे तु दूरं व्यवहितं परम् ।
भासुरं भविकं भव्यं कल्याणं श्वोवसीयसम् ॥ १४२ ॥
285 श्वश्श्रेयसं शिवं भद्रं कुशलं सूनृतं शुभम् ।
श्रेयश्चैते समीपाद्या धर्मे क्ली तद्वति त्रिषु ॥ १४३ ॥

सुखं दुःखं मलं छिद्रं किलासं सिध्मममर्मरौ ।
रभसः पलितं श्वित्रमेतेऽपि त्रिषु धर्मिणि ॥ १४४ ॥

(इति भगवता यादवप्रकाशेन विरचितायां वैजयन्त्यां
सामान्यकाण्डे अर्थवल्लिङ्गाध्यायः)

(सामान्यकाण्डस्समाप्तः)

अथ द्व्यक्षरकाण्डः

पुंलिङ्गाध्यायः

अथ काण्डैरनेकार्थाः प्रोच्यन्तेऽत्र परैस्त्रिभिः ।
द्व्यक्षरास्त्र्यक्षराश्शेषा इति काण्डेषु ते क्रमात् ॥ १ ॥
अकारादि हकारान्तं नाम्नामाद्यक्षरक्रमात् ।
संग्रहो द्व्यक्षरादीनां प्रोक्तान्प्रायो विना पुरा ॥ २ ॥
5 अर्थः स्याद्विषये मोक्षे शब्दवाच्ये प्रयोजने ।
व्यवहारे धने शास्त्रे वस्तुहेतुनिवृत्तिषु ॥ ३ ॥
अर्कोऽर्कपर्णे स्फटिके ज्येष्ठभ्रातरि भास्वति ।
अवयश्शैलमेषार्का अद्रयोऽर्कगिरिद्रुमाः ॥ ४ ॥
अष्टावतिशयक्षौमावर्घौ पूजाप्रतिक्रयौ ।
10 अर्याश्शास्तृस्वामिवैश्यास्सर्पे वृत्रासुरेऽप्यहिः ॥ ५ ॥
अंशुस्सूत्रादिसूक्ष्मांशेऽप्यंकश्चिह्नेऽतिकोरसोः ।
आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि ॥ ६ ॥
यत्नेऽर्केऽग्नौ मतौ वातेऽप्याखू सूकरमूषिकौ ।
आधिस्तु व्यसने चित्तदुःखेऽधिष्ठानबंधयोः ॥ ७ ॥
15 इंद्रो विषात्मशक्रार्केष्वीश्वरे नामतः परः ।
इष्वोऽभिलाष आचार्य ऊमो व्योम्नि पुरेऽपि च ॥ ८ ॥
ग्रीष्मोष्णबाष्पा ऊष्माण ऊर्जावुत्साहकार्त्तिकौ ।
ऋषिस्तु वेदे भृग्वादौ ज्ञानवृद्धे दिगंबरे ॥ ९ ॥
ओघः परंपरायां स्याज्जलस्रोतसि संचये ।
20 करो घनोपले हस्ते प्रत्याये रश्मिशुण्डयोः ॥ १० ॥
दातुं भूषितकन्यायां कूपो गर्ते प्रहावपि ।

क्षणो व्यापारवैकल्ये कालभेदाल्पकालयोः ॥ ११ ॥
उत्सवे परतन्त्रत्वे मध्यावसरपर्वसु ।
कन्तू कुसूलकन्दर्पौ प्राज्ञकाव्यकृतौ कवी ॥ १२ ॥
25 कण्ठो गलेऽन्तिके शब्दे कपयोऽर्केभवानराः ।
गुडभस्मरसः क्षाराः क्षोदो रजसि पेषणे ॥ १३ ॥
क्रतू अध्वरसंकल्पौ कल्पान्तेऽपचये क्षयः ।
कुक्षौ वासे च कच्छस्तु पार्श्वे गुह्यांबरे तटे ॥ १४ ॥
कारुस्तु विश्वकर्मापि धान्यांशे शीकरे कणः ।
30 कालो दिष्टे यमे काचो मृद्भेदे शिक्यदृग्रुजोः ॥ १५ ॥
उत्पातेऽर्के ध्वजे केतुः क्षेदौषधिशशांकयोः ।
कोणाश्शब्दाश्रिलगुडाः कल्पो न्याये सुरद्रुमे ॥ १६ ॥
विकल्पेऽपि च कक्षस्तु गुल्मे स्पर्धापदे तृणे ।
काम्यस्पृहास्मराः कामाः कलहेऽन्त्ययुगे कलिः ॥ १७ ॥
35 कुंभो गजशिरोऽन्तेऽपि पक्ष्यर्केष्वनिलाः खगाः ।
खरुः पुंस्मररुद्रेषु गर्मुद्रुक्मे खगे रवौ ॥ १८ ॥
गणाः प्रमथसंख्यौघा ग्रावाणौ पर्वतोपलौ ।
तन्तुनागाग्रहौ ग्राहौ गुल्मो व्यूढा च वाहिनी ॥ १९ ॥
गण्डो गर्वेऽप्यथार्कादिसत्त्वादानाग्रहा ग्रहाः ।
40 गुणस्त्वावृत्तिशब्दादिज्येंद्रियामुख्यतन्तुषु ॥ २० ॥
ग्रंथो द्रव्यं वचश्शास्त्रं द्वात्रिंशद्वर्णसंचयः ।
गर्भोऽपवरकेऽन्नेऽग्नौ सुते पनसकंटके ॥ २१ ॥
कुक्षौ कुक्षिस्थजन्तौ च गंधो लेशे महीगुणे ।
घृणिर्ज्वालांशुवीचीषु चरुः स्थाल्यां हविष्यपि ॥ २२ ॥
45 चटुश्चाटुश्च राजादिस्तुतौ पशुपिंचिडके ।

चक्री विष्णौ कुलालेऽहौ च्युपौ पवनसंक्रमौ ॥ २३ ॥
वशाभिप्राययोश्छंदो जूर्णी रविहविर्भुजौ ।
टंकौ प्रमाणगर्वौ च डिंबः छीहखगांडयोः ॥ २४ ॥
तर्काः कांक्षाविनर्कोहास्त्वष्टा ताक्ष्ण द्युशिल्पिनि ।
50 मणिदोषे भये त्रासस्तिष्यः पुष्ये कलौ युगे ॥ २५ ॥
द्वारपाले यमे दण्डी दन्तोऽद्रिकटके रदे ।
दायो दाने यौतकादिधने वित्ते च पौतृके ॥ २६ ॥
दवदावौ वनारण्यवह्न्योः स्वर्गार्कयोर्द्युवा ।
धवो वृक्षे नरे पत्यौ ध्वांक्षः स्याद्वायसे बके ॥ २७ ॥
55 धातुर्वातादिशब्दादिगैरिकादित्वगादिषु ।
महाभूतेष्विंद्रियेषु शब्दयोनिस्वभावयोः ॥ २८ ॥
लोहेऽर्थे गैरिकस्वर्णरेतोऽस्थिषु विशेषतः ।
नरोऽर्जुने मनुष्ये च नाकः स्वर्गान्तरिक्षयोः ॥ २९ ॥
ग्राहाभ्राहिगजा नागा नाभिः क्षत्रे महानृपे ।
60 न्यंकुर्गुरुकुलेवासी शिष्यो मुनिमृगावपि ॥ ३० ॥
नाशः पलायने मृत्यौ परिध्वंसेऽप्यदर्शने ।
नग्ना वैतालिकाद्याश्च पिण्डो वृत्ते तनौ गुडे ॥ ३१ ॥
पीयुः काल उलूके च पीलुः काण्डे गजे द्रुमे ।
पुण्ड्राः कृमीक्षुतिलकाः पत्री श्येने शरे खगे ॥ ३२ ॥
65 प्रेषणे मर्दने प्रैषः पुंखः श्वेतशरांगयोः ।
पवी वातास्त्रधारे च पाकपोतौ शिशावपि ॥ ३३ ॥
पट्टो नेत्रेऽपि शाणे स्यात् पिण्डिः कल्केऽपि तैलजे ।
पणो मूल्ये ग्लहे माने कार्षिकव्यवहारयोः ॥ ३४ ॥
द्यूते विक्रय्यशाकादिबद्धमुष्टौ भृतौ धने ।

70 पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु ॥ ३५ ॥
पार्श्वद्वारे विरोधेऽर्धमासे चुल्लिबिलेऽन्तिके ।
प्रायो वयसि बाहुल्ये तुल्यानशनमृत्युषु ॥ ३६ ॥
पाशो रज्जौ कर्णशब्दात्परः कर्णेऽतिशोभने ।
क्रमनिम्नमहीभागकपिप्लुतिखगाः प्लवाः ॥ ३७ ॥
75 प्राणस्तु प्रणवे जीवे जीविते परमात्मनि ।
इन्द्रिये वायुभेदे च बलान्तर्यामिणोरपि ॥ ३८ ॥
श्वेतार्के डाडिमे फालो बन्धास्त्रीसाधियन्त्रणाः ।
बलिः पूजोपहारे च दैत्यभेदे करेऽपि च ॥ ३९ ॥
बाष्पोऽश्रुण्यंबुधूमे च भानवोऽर्कहरांशवः ।
80 भ्रूणोऽर्भके स्त्रैणगर्भे गर्भिण्यां श्रोत्रियद्विजे ॥ ४० ॥
भवो भद्रे हरे प्राप्तौ सत्तासंसारजन्मसु ।
भागा भाग्यांशतुर्यांशा भरभारौ गरिम्ण्यपि ॥ ४१ ॥
भरवीवधयोश्चान्त्यौ भूस्पृशौ वैश्यमानवौ ।
विश्लेषे दारणे भेदो भेनस्सूर्ये निशाकरे ॥ ४२ ॥
85 भावो लीलाक्रियाचेष्टाभूत्यभिप्रायजन्तुषु ।
पदार्थमात्रे सत्तायामात्मयोनिस्वभावयोः ॥ ४३ ॥
भोगो राज्ये धने सौख्ये पालनाभ्यवहारयोः ।
फणे देहे च सर्पस्य वेश्यादीनां भृतावपि ॥ ४४ ॥
मन्त्राद्दृगादिगुह्योक्ती मन्युर्दैन्येऽध्वरे क्रुधि ।
90 मर्को मनसि पायौ च मोहाः कुन्मौर्ख्यमूढताः ॥ ४५ ॥
मार्गो मृगपदे मासि सौम्यर्क्षेऽन्वेषणेऽध्वनि ।
मूत आतञ्चने व्रीहौ व्रीह्यादेर्बन्धने तृणैः ॥ ४६ ॥
मृगस्तु मृगशीर्षेऽपि मोक्षो मृत्यौ मरुद्गिरौ ।
यन्ता हस्तिपके सूते यज्ञोऽग्न्यात्महरीष्टिषु ॥ ४७ ॥

95 ययुरश्वेऽश्वमेधाश्वे योगो विस्रब्धघातिनि ।
प्राप्तौ सन्नहनोपायध्यानसंगतियुक्तिषु ॥ ४८ ॥
रसो रागे विषे वीर्ये तिक्तादौ पारदे द्रवे ।
रेतस्यास्वादने हेम्नि निर्यासेऽमृतशब्दयोः ॥ ४९ ॥
रश्मी ज्वालाप्रग्रहौ च रदौ दन्तविलेखयोः ।
100 राजा तु क्षत्रिये चन्द्रे लताभेदे नृपे प्रभौ ॥ ५० ॥
रागोऽनुरागे लाक्षादौ त्विषि राकस्तु पृष्णि च ।
रंगौ तु स्थानरागौ च भूप्रदेशे मृगे लिगुः ॥ ५१ ॥
भोजने लेपने लेपो लोकस्स्याद्विष्टपे जने ।
वंशः पृष्ठास्थ्नि गेहोर्ध्वकाष्ठे वेणौ गणे कुले ॥ ५२ ॥
105 नासोर्ध्वास्थ्नीक्षुभेदे च वहिरुक्षिण हयेऽनले ।
वलो धान्येऽसुरे काके गवां श्वामेऽनिले वहः ॥ ५३ ॥
वेणू वेदसहस्रांशू गोष्ठाध्वनिवहा व्रजाः ।
वालौ पुच्छाश्वपुच्छौ च व्याजश्छद्मापदेशयोः ॥ ५४ ॥
विधी तु दैवकालौ च वाजी त्वश्वे शरे खगे ।
110 विधुर्निशाकरे काले विष्णौ वातेऽग्निरक्षसोः ॥ ५५ ॥
बृन्दविन्यासयोर्व्यूहो वृषोक्षण्यऽग्र्ये पुमिन्द्रयोः ।
वृत्राश्शत्रुतमोदैत्या वेगः किंपाकरंहसोः ॥ ५६ ॥
वेधसो विष्णुधातृज्ञाश्शादः कर्दमशष्पयोः ।
शंभुर्धातृहरार्हत्सु शक्रः कुटजवज्रिणोः ॥ ५७ ॥
115 शंबो वज्रे लोहमयवलये मुसलाग्रगे ।
शरो रसाग्रसारेऽपि शूकोऽनुक्रोशशुंगयोः ॥ ५८ ॥
शब्दोऽक्षरे यशोगीत्योर्वाक्ये स्वे श्रवणे ध्वनौ ।
शंकुः पत्रसिराजाले कीलेऽस्त्रे मेढ्रसंख्ययोः ॥ ५९ ॥
कुक्कुटेऽग्नौ मयूरेऽशौ वृक्षे केतुग्रहे शिखी ।

120 पद्ये यशसि च श्लोकष्षण्डौ विट्चरपण्डकौ ॥ ६० ॥
ष्यूमस्यूमौ जले चन्द्रे तन्तुमंगलरश्मिषु ।
सम्राजोऽग्नीन्द्रविष्ण्वर्का यश्च स्यान्मण्डलेश्वरः ॥ ६१ ॥
राजसूयेन येनेष्टं राज्ञश्शास्त्याज्ञया च यः ।
सर्गास्तु सर्जनाध्यायस्वभावोत्साहनिश्चयाः ॥ ६२ ॥
125 सन्धिश्श्लेषे सुरुंगायां नाव्यांगे योनिरन्ध्रयोः ।
स्वरोऽकाराद्युदात्ताद्योष्षड्जादौ प्राणिनां स्वने ॥ ६३ ॥
सरटौ पक्षिजलदौ स्पशौ तु चरसंयुगौ ।
स्तंभौ स्थूणाजडीभावौ यूपांशे कुलिशे स्वरुः ॥ ६४ ॥
स्कन्दो धाता नदीकूलं साद्यश्चारोहसूतयोः ।
130 सालो मत्स्ये वृक्षभेदे प्राकारद्रुममात्रयोः ॥ ६५ ॥
सिक्थो ना भक्तपूलाके मधूच्छिष्टे क्वचिन्नपुम् ।
सुतः पुत्रे सोमरसे सोमौ व्योमनिशाकरौ ॥ ६६ ॥
स्तूपा वायुरणोच्छ्राया आज्ञाह्वानाध्वरा हवाः ।
हर्तुर्मृत्यौ महारागे हरा रुद्राग्निगर्दभाः ॥ ६७ ॥
135 हंसोऽश्वेऽर्के हरे विष्णौ खगे निर्लोभभूभुजि ।
जीवे श्वेतवृषे भिक्षौ पार्ष्णिकाप्रसभौ हठौ ॥ ६८ ॥
वारिपर्णी च हेतुस्तु कारणे कर्मजन्मनोः ।
हीरस्सर्पे हरे सिंहे हेलिरालिंगने रवौ ॥ ६९ ॥

(इति भगवता यादवप्रकाशेन विरचितायां
वैजयन्त्यां द्व्यक्षरकाण्डे पुंलिङ्गाध्यायः)

स्त्रीलिङ्गाध्यायः

अर्चा पूजाप्रतिमयोरार्तिश्चापाग्रपीडयोः ।
अन्दूस्तु शृंखला पादभूषाप्यष्ठी फलास्थ्यपि ॥ १ ॥
आस्था गोष्ठ्यां प्रतिज्ञायां तत्परत्वेऽवलंबने ।
आशीरुरगदंष्ट्रायां शुभवाक्याभिलाषयोः ॥ २ ॥
5 आलिस्सेतौ सखीपङ्क्त्योराशा दिगतितृष्णयोः ।
आजिस्समेऽपि भूभागे गोनाडीभ्रुवाक्षिवडा ॥ ३ ॥
इलाप्येतासु वाचि च स्यादिज्या यागपूजयोः ।
इष्टिस्स्पृहायजनयोरिरा भूवाक्सुरांबुषु ॥ ४ ॥
अन्ने च स्यादथो ईतिरुपसर्गप्रवासयोः ।
10 ईहा तु लिप्सोद्यमयोरूतिस्स्यूत्याभिरक्षयोः ॥ ५ ॥
ऊर्णा भ्रूमध्यगावर्ते तन्तौ मेषादिलोमसु ।
हिंसाविक्षेपयोः कीर्णिः कीर्तिः पंके यशस्यपि ॥ ६ ॥
कक्ष्या कच्छे वरत्रायां कांच्यां गेहप्रकोष्ठके ।
कर्मी हाटकपुत्र्यां स्यादपि शालापलालयोः ॥ ७ ॥
15 कासूर्बुद्धौ कुवाच्यस्त्रे कान्तिश्शोभाभिकामयोः ।
काष्ठोत्कर्षे सीम्नि दिशि क्षोण्यां वासे क्षये क्षितिः ॥ ८ ॥
क्रिया तु निष्कृतौ शिक्षाचिकित्सोपायकर्मसु ।
करणारंभपूजासु चेष्टायां संप्रधारणे ॥ ९ ॥
काले शिल्पे वित्तवृद्धौ चन्द्रांशे कलने कला ।
20 महाभूतेष्विन्द्रियेषु ज्ञानावयवयोरपि ॥ १० ॥
कोटिस्त्वश्रौ प्रकर्षेऽग्रे दशोपायगमे गतिः ।
गुप्तिः क्षितिव्युदासेऽपि गुञ्जा भाण्डेऽपि वादने ॥ ११ ॥

घृणा जुगुप्साकृपयोर्घोणापि रथकर्णिका ।
चिन्ताचर्चिक्ययोश्चर्चा चूर्णिर्ग्रन्थे कपर्दके ॥ १२ ॥
25 चापाग्रे पिष्टके चूलिश्छर्दिरुद्वान्तिरेतसोः ।
छाया त्वनातपे कान्तौ प्रतिबिंबार्कजाययोः ॥ १३ ॥
जनिर्वरस्त्रीपत्न्योश्च जामिस्स्वसृकुलस्त्रियोः ।
जातिश्छन्दसि मालत्यां सामान्ये जन्मगोत्रयोः ॥ १४ ॥
अलक्ष्म्यग्रजयोर्ज्येष्ठा गृहगोल्यृक्षभेदयोः ।
30 जिह्वा वाग्रसनार्चिष्षु तन्द्रा निद्राप्रमीलयोः ॥ १५ ॥
तन्वीर्गुडूचीसिरयो रज्वां वीणादिगे गुणे ।
तन्दूर्द्रोणिप्लवे दर्व्यां वाद्ये काले लवे तुटिः ॥ १६ ॥
तुला साम्ये स्तंभपीठे लेशसंशययोस्त्रुटिः ।
तूली शय्याकूर्चिकयोस्त्रेता त्वग्नित्रये युगे ॥ १७ ॥
35 दरदो भीतिहृद्रूढा दृष्टिर्धीदर्शनाक्षिषु ।
द्रोणी स्यादम्बुवाहिन्यां द्रवभाण्डे गिरिप्लवे ॥ १८ ॥
दिष्टिस्सुखे च दाने च धात्री भुव्युपमातरि ।
धनुस्सुस्त्रीधनुर्ज्यासु धाना बीजेऽपि भूरुहाम् ॥ १९ ॥
धारास्त्राग्रेंऽबुसंतत्यां सैन्याग्रेऽश्वगतिष्वपि ।
40 धीता सुतायां बुद्धौ च धृतिस्सौख्येऽपि धारणे ॥ २० ॥
निष्ठोत्कर्षे व्यवस्थायां नाशेऽन्ते व्रतयज्ञयोः ।
भित्तिमूले प्रथौ नेमिर्निन्दा कुत्सापवादयोः ॥ २१ ॥
पालिरश्रिः प्रदेशोऽकस्तश्मश्रुः स्त्री त्सरुश्छदः ।
छन्दस्संख्यावली पङ्क्तिः पक्तिर्गौरवपाकयोः ॥ २२ ॥
45 क्षुद्रग्रामेऽपि पल्ली स्यात्प्रभार्चिषि च भासि च ।
प्रज्ञा प्राज्ञास्त्रियां बुद्धौ प्रजा तु जनपुत्रयोः ॥ २३ ॥
प्रसूर्जनन्यामश्वायां पारिस्सृणिगुणेऽपि च ।

पादुकोपानहोः पादूः प्राप्ती अभिगमोदयौ ॥ २४ ॥
पीडावमर्दकृपयोः प्रीतिः प्रेमप्रमोदयोः ।
50 प्रेक्षा नृत्तेक्षणे बुद्धौ बाधा दुःखनिषेधयोः ॥ २५ ॥
भसदौ गुह्यविट्कोष्ठौ भक्तिर्भागे निषेवणे ।
भिक्षा तु भिक्षितान्नादौ याच्ञायां भृतिसेवयोः ॥ २६ ॥
भूमिः क्षितौ स्थानमात्रे भूतिः श्रीजन्मभस्मसु ।
मतिः कांक्षा शेमुषी च मल्लिर्मृत्पात्रपीठयोः ॥ २७ ॥
55 माता तु गव्यकारादौ ब्राह्मचाद्यासु प्रसूमयोः ।
मूर्तिर्देहप्रतिमयोः काककाठिन्ययोरपि ॥ २८ ॥
पुंश्चल्यां मौक्तिके मुक्ता कारासंयमयोर्यतिः ।
गमने जीवने यात्रा रुजा रुग्भङ्गमृत्यवः ॥ २९ ॥
राजिः पङ्क्तौ राजसर्पे क्षेत्रेऽधो रसनस्य च ।
60 रीतिर्दग्धसुवर्णादिमले स्थित्यारकूटयोः ॥ ३० ॥
प्रचारे श्रवणे पङ्क्तौ रंडा स्यात् विधवापि च ।
रुचिः कान्त्यर्चिषोर्भासि तिंत्रिडीके स्पृहाश्रियोः ॥ ३१ ॥
रेटिर्वेहेश्च रटितं वाणी चासंयतोत्कटा ।
रेखायामावलौ रेखा लङ्का पूर्भेदशाखयोः ॥ ३२ ॥
65 लीला क्रिया विलासश्च वपा गोण्डो विलं तथा ।
वलिर्मध्यगरेखोर्मिजीर्णत्वग्गृहदारु च ॥ ३३ ॥
वर्ध्री स्नायुनि नध्रयां च व्रज्या पर्यटने गतौ ।
विधा विधाने हस्त्यन्ने भृत्यामृद्धिप्रकारयोः ॥ ३४ ॥
वीरुधौ गुल्मगुल्मिन्यौ वीथी पंक्त्यध्वनोरपि ।
70 वीचिः पंक्त्यूर्मिलेशेषु व्युष्टी फलसमृद्धते ॥ ३५ ॥
वृत्तिर्ग्रन्थाजीवयोश्च वेलाब्धिजलवर्धने ।
काले सीम्नि च वेणी तु केशबन्धे जलस्रुतौ ॥ ३६ ॥

वृद्धिस्सुखेऽपि जंघापि वारुश्शुक्तिस्तु दृग्रुजि ।
अश्वावर्ते च शाला तु गृहांगस्कन्धशाखयोः ॥ ३७ ॥
75 शक्तिः कासूर्बलं लक्ष्मीश्शरदावृतुवत्सरौ ।
शंका वितर्कभययोश्श्रद्धास्तिक्याभिलाषयोः ॥ ३८ ॥
शाखा वेदप्रभेदेषु बाहौ पादद्रुमांगयोः ।
श्यामा कन्या निशा चाथ शान्तिः प्रशममंगले ॥ ३९ ॥
शिखा ज्वालाकेकिमौल्योश्शिफा शाखाग्रमौलिषु ।
80 शुण्डा करिकरे मद्ये श्रुतिर्वेदे श्रवस्यपि ॥ ४० ॥
शय्या तल्पे ग्रन्थगुंफे शंसा तु स्तववाक्ययोः ।
संविद्युद्धे प्रतिज्ञायां संकेताचारनामसु ॥ ४१ ॥
संभाषणे क्रियाकारे विज्ञाने तोषणेऽपि च ।
सभा तु संसदि द्यूते गृहे सामाजिकेषु च ॥ ४२ ॥
85 संज्ञार्कभार्या चैतन्यं हस्ताद्यैस्सूचनाभिधा ।
संस्था व्यवस्थाप्रणिधिसमाप्त्याकारमृत्युषु ॥ ४३ ॥
सन्धावधौ प्रतिज्ञायां सातिर्दानावसानयोः ।
सीमसीमे तु कूलेऽपि स्थानमर्यादयोस्स्थितिः ॥ ४४ ॥
गंगेष्टिमूर्वयोस्स्नुह्यां लेपभेदेऽमृते सुधा ।
90 रश्मिमेखलयोस्स्यूना सीता सस्ये हलाध्वनि ॥ ४५ ॥
स्थूणा सूर्म्यां गृहस्तंभे हिंसा चौर्यादिके वधे ।
हेलावज्ञाभावचारौ हेतिर्ज्वालांशुरायुधम् ॥ ४६ ॥

(इति भगवता यादवप्रकाशेन विरचितायां वैजयन्त्यां
द्व्यक्षरकाण्डे स्त्रीलिङ्गाध्यायः)

नपुंसकलिङ्गाध्यायः

अभ्रं सलिलदे व्योमन्यस्त्रं कोदण्ड आयुधे ।
अग्रं पुरशिखामानश्रैष्ठ्याधिक्यफलेषु च ॥ १ ॥
मुष्के पक्ष्यादिकोशेऽण्डं दुःखैनोव्यसनेष्वघम् ।
अर्शसी व्याधिदुर्नाम्नी आज्ये श्रीवाससर्पिषी ॥ २ ॥
5 वर्षार्थजीवितेष्वायुरास्यं मुखबिले मुखे ।
उरस्तु वक्षसि श्रेष्ठ ऋतं तथ्यसिलोञ्छयोः ॥ ३ ॥
ओजोऽवष्टंभबलयोरोकसी मंदिराश्रमौ ।
क्रियायजनयोः कर्म क्षीरं दोहजमंबु च ॥ ४ ॥
कुण्डं स्थाल्यां जलाधारविशेषेऽनलगर्तके ।
10 पिण्याको नग्नभूः किण्वं कूलं तीरे चमूकटौ ॥ ५ ॥
क्षेत्रं गृहे पुरे देहे केदारे योनिभार्ययोः ।
पुण्यस्थाने समूहे च घृतं त्वाज्येऽम्बुसर्पिषोः ॥ ६ ॥
चक्रं सैन्ये जलावर्ते रथांगे चयराष्ट्रयोः ।
संसारे मण्डले वृत्ते छद्मभेदास्त्रभेदयोः ॥ ७ ॥
15 चैत्यं चितांके बुद्धाण्ड उद्देशेऽद्रौ सुरालये ।
चिह्नमंके पताकायां छद्म सद्मनि कैतवे ॥ ८ ॥
छन्दः श्रुतीच्छापद्येषु च्छिद्रं रंध्रापराधयोः ।
जालं गवाक्ष आनाये क्षारके कपटे गणे ॥ ९ ॥
जीलं चर्मपुटः कोशो दृतिः करकपत्रिका ।
20 ज्योतिस्ताराग्निभाज्वालादृक्पुत्रार्थाध्वरात्मसु ॥ १० ॥
तंत्रं स्वराष्ट्रव्यापारे तन्तुवाने परिच्छदे ।
शास्त्रौषधान्नमुख्येषु प्रयोगेऽध्वरकर्मणां ॥ ११ ॥

एकस्यैवोभयार्थत्वे कुडुंबव्यापृतावपि ।
तल्पं शय्याट्टजायासु तनुपी तनुविस्तृती ॥ १२ ॥
25 त्रपु सीसे च रंगे च तरसी बलरंहसी ।
तीर्थं मंत्राद्युपाध्यायशास्त्रेष्वंभसि पावने ॥ १३ ॥
पात्रोपायावतारेषु स्त्रीपुष्पे योनियज्ञयोः ।
तेजो बले प्रभावेऽग्नौ ज्योतिष्यर्चिषि रेतसि ॥ १४ ॥
नवनीतेऽनले धर्मे दानं हस्तिमदेऽपि च ।
30 द्रव्यं गुणानामाधारे भेषजे योगवित्तयोः ॥ १५ ॥
द्वंद्वं युग्मं हिमोष्णादि मिथुनं कलहो रहः ।
धाम जन्मप्रभावान्नभास्सु रवे भोजने गृहे ॥ १६ ॥
नेत्रं नाड्यां तरोर्मूले वस्त्रे दृशि मथो गुणे ।
नाट्यं तौर्यत्रिके नृत्ते नालं विवरशेपसोः ॥ १७ ॥
35 पदं स्थाने शरे त्राणे पादांके पादचिह्नयोः ।
शब्देंऽशुवस्तुवाक्येषु व्यवसायापदेशयोः ॥ १८ ॥
पर्व ग्रन्थौ पंचदश्यां प्रस्तावे विषुवादिके ।
पक्ष्म सूत्राद्यवयवे किंजल्के नेत्रलोमसु ॥ १९ ॥
पत्रं तु वाहने पर्णे क्षुरिकागरुतोरपि ।
40 पयोऽंभसि च दुग्धे च पाथसी सलिलौदनौ ॥ २० ॥
पात्रं तु भाजने योग्ये वित्ते कूलद्वयान्तरे ।
पाथींषि स्वर्गचंद्रार्काः पिच्छं बर्हे खगच्छदे ॥ २१ ॥
पोत्रं मुखाग्रदेशे स्यात्सूकरस्य हलस्य च ।
नवनीतं पयः पीथं बर्हं पर्णशिखण्डयोः ॥ २२ ॥
45 बीजं शुक्ले फलास्थ्न्यन्ने भर्मणी स्वर्णवेतने ।
वणिङ्मूलधने पात्रे भाण्डं भूषाश्वभूषयोः ॥ २३ ॥

भाग्यं कर्मण्यन्यजन्मकर्मण्यपि शुभाशुभे ।
भर्गसी रेतआलोकौ महसी तेजउत्सवौ ॥ २४ ॥
माल्यं पुष्पे पुष्पदाम्नि मूल्यं वेतनवस्नयोः ।
50 मुखं तु वदने मुख्ये ताम्रे द्वाराभ्युपाययोः ॥ २५ ॥
मूलं वशीकृतौ स्वीये शिफानारान्तिकादिषु ।
गमने वाहने यानं रत्नं श्रेष्ठे मणावपि ॥ २६ ॥
रहो रहस्ये सुरते रिष्टं नाशे शुभेऽशुभे ।
रुक्मं हेम सुलोहं च रेतसी शुक्रमंबु च ॥ २७ ॥
55 रूपं शब्दे पशौ श्लोके ग्रन्थावृत्तौ मितादिषु ।
सौन्दर्ये च स्वभावे च शारद्रेण्वार्तवे रजः ॥ २८ ॥
ललं पल्लव उद्याने लक्ष्म चिह्नवरिष्टयोः ।
स्यादुपच्छन्दने लालं गुह्यार्थपरभार्ययोः ॥ २९ ॥
लिङ्गं शेफसि वेर्षेऽशे चिह्ने बुद्ध्यादिमंहतौ ।
60 वयः खगेऽन्ने वर्षेऽर्थे शुभाकारे तनौ वपुः ॥ ३० ॥
वर्चोऽर्चीरूपविड्भास्सु वनं भास्यप्सु कानने ।
व्रतं विष्ण्वनुवर्षेज्यानपोमासाग्निभुक्तिषु ॥ ३१ ॥
वीर्यं पराक्रमे रेतस्यन्नमाहात्म्ययोरपि ।
वेष्टं ब्रह्मणि नाके च शल्के शकलवल्कले ॥ ३२ ॥
65 शस्त्राण्यस्त्रमयश्शंसा शास्त्रं ग्रन्थनिदेशयोः ।
शार्ङ्गं चापे हरेश्चापे शीलं वृत्तस्वभावयोः ॥ ३३ ॥
शुल्बं ताम्रे यज्ञकर्मण्याचारे जलसन्निधौ ।
शोचिश्शोकांशुपैंगल्यशुद्धत्वेषु सरोऽप्सु च ॥ ३४ ॥
यज्ञभेदे सदादाने सत्रमाच्छादने वने ।
70 सर्पिर्घृते च तोये च सान्त्वे दाक्षिण्यसान्त्वने ॥ ३५ ॥

स्नानीयेऽभिषवे स्नानं स्थानं स्यादाश्रये स्थितौ ।
सूत्रं तन्तौ संग्रहोक्तौ सुखमानन्दतोययोः ॥ ३६ ॥
स्रोतोऽम्बुनिर्गमद्वार इन्द्रियेऽप्सु जलस्रुतौ ।
हविर्हव्ये घृते तोये हेम्नि काञ्चनवेतने ॥ ३७ ॥

(इति भगवता यादवप्रकाशेन विरचितायां वैजयन्त्यां
द्व्यक्षरकाण्डे नपुंसकलिङ्गाध्यायः)

अर्थवल्लिङ्गाध्यायः

अर्थ्योऽर्थयुक्तात्मवतोरन्त्योऽन्त्यजनिकृष्टयोः ।
क्लृप्तेऽर्घ्यायार्घ्यमर्घार्हेऽप्यदस्त्वत्र परत्र च ॥ १ ॥
अन्यौ विभिन्नासदृशावार्यस्साधुकुलीनयोः ।
आद्यमादिभवे भक्ष्येऽप्युत्पत्तिरहितेऽप्यृजुः ॥ २ ॥
5 मुख्यान्यकेवलेष्वेकः कष्टौ गहनदुःखिनौ ।
कल्या नीरुग्दक्षमज्जा योग्यगुक्तहिनाः क्षमाः ॥ ३ ॥
कटुस्तिक्ताप्रियाकार्यसुरभ्यूपणमत्सरे ।
क्रूरो भयंकरे क्रुद्धे नृशंसे कठिनोष्णयोः ॥ ४ ॥
गौरोऽरुणे सिते पीते गृह्यस्त्वस्वैरिपक्ष्ययोः ।
10 छिन्नास्ये छिन्ननेत्रे च चिल्लं चुल्लं च पिल्लवत् ॥ ५ ॥
चोद्यं चित्रे चोदनार्हे चारु चित्रवचस्यपि ।
जडो जाल्मश्च निर्बुद्धौ स्तब्धेऽनालोच्यकारिणि ॥ ६ ॥
ज्यायान् ज्येष्ठश्चाग्रजन्मन्यतिवृद्धातिशस्तयोः ।
जात्यःश्रेष्ठे कुलीने च डिंभो बालिशबालयोः ॥ ७ ॥
15 द्रुतं शीघ्रे शीघ्रगतेऽप्यवदीर्णविलीनयोः ।
दृढं गाढेऽधिके स्थूले धूतं त्यक्ते प्रकंपिते ॥ ८ ॥
धृष्णुर्धृष्टे प्रगल्भे च कुटिले बंधुरे नतम् ।
न्यक्षं कृत्स्ने निकृष्टे च निजमात्मीयनित्ययोः ॥ ९ ॥
नीचं खर्वे निकृष्टे च समर्थेऽधिपतौ प्रभुः ।
20 प्राप्तं न्याय्ये च लब्धे च विपुलानेकयोर्बहु ॥ १० ॥
बालो मूर्खे शिशौ भव्यो भावी योग्यश्शुभोऽपि च ।
मिश्रेऽपि भिन्नं क्लिष्टं तु म्लानाविस्पष्टवाक्ययोः ॥ ११ ॥

मुग्धं सौम्ये नवे मूढे मूढो मोहिनि तंद्रिते ।
मृद्वतीक्ष्णे कोमले च बद्धोपरतयोर्यतः ॥ १२ ॥
25 याप्यं गर्ह्ये यापनीये पृथक्संयुक्तयोर्युतम् ।
न्याय्यसंयुक्तयोर्युक्तं रूक्षो निष्प्रेम्ण्यचिक्कणे ॥ १३ ॥
रथ्यो रथहितेऽमुष्य स्वीयेऽस्याश्वे च वोढरि ।
रागवद्रोहितौ रक्तौ रामश्यारौ सितेऽसिते ॥ १४ ॥
न्याय्यलब्धव्ययोर्लभ्यं लिप्तो भक्षितदिग्धयोः ।
30 लघु त्वसारागुरुणोरिष्टे क्षिप्रमनोज्ञयोः ॥ १५ ॥
लोलं चले लोलुपे च व्यग्रो व्यापृत आकुले ।
वल्गु मंजौ च वामस्तु सौम्ये सव्यप्रतीपयोः ॥ १६ ॥
विद्धं विदारिते तुल्ये विन्नं लब्धे विचारिते ।
शितिश्श्वेते च नीले च शुभो मंजुप्रशस्तयोः ॥ १७ ॥
35 शुभ्रं शुक्ले भास्वरे च शुक्तं तु परुषाम्लयोः ।
सभ्यस्सामाजिके साधौ सव्यो दक्षिणवामयोः ॥ १८ ॥
सन्नमल्पे विशीर्णादौ स्वादुर्मधुरमृष्टयोः ।
स्फुटाः स्पष्टव्याप्तफुल्लाःस्थूलौ तु जडपीवरौ ॥ १९ ॥
मंत्रिण्यपि सुहृत्स्निग्धे प्रतिज्ञावत्यपि स्थितः ।
40 मंदस्वच्छन्दयोस्स्वैरो हीनो मुक्तविगर्ह्ययोः ॥ २० ॥

(इति भगवता यादवप्रकाशेन विरचितायां वैजयन्त्यां
द्व्यक्षरकाण्डे अर्थवल्लिङ्गाध्यायः)

नानालिङ्गाध्यायः

नानालिङ्गेषु सर्वत्र स्वयमेव क्वचित्क्वचित् ।
उन्नेयमर्थवल्लिङ्गं गुणद्रव्यक्रियार्थकम् ॥ १ ॥
अक्षो रथांग आधारे व्यवहारे विभीतके ।
शकटे पाशके कर्षे द्यूतभेदेऽक्षमिन्द्रिये ॥ २ ॥
5 अब्जो धन्वन्तरौ शंखे चन्द्रे क्ली लवणेऽम्बुजे ।
प्रदेशेंऽश उपायेऽगमंगो देशेऽगशालिनि ॥ ३ ॥
अविर्भूपुष्पवत्योस्त्री वायुप्राकारभास्तु ना ।
अजः पितामहेऽनादौ छागे विष्णौ हरे रवौ ॥ ४ ॥
अन्तोऽस्त्र्यवसिते मृत्यौ स्वरूपे निश्चयेऽन्तिके ।
10 नार्धमासेऽणिरङ्कश्रौ रूप्येऽक्षाग्रध्रुवे ध्रुवे ॥ ५ ॥
अर्हन्तौ जिनसम्मान्यावर्वन्तौ हयकुत्सितौ ।
अन्धोऽचक्षुस्तमोऽप्यन्धमर्चिर्भाज्वालयोर्न ना ॥ ६ ॥
अस्त्र आस्त्रश्च पुंलिंगौ क्लेशे क्ली रुधिरेऽश्रुणि ।
आद्यो मुख्ये धातृपूर्वेष्वामोऽपक्वेऽपि रुज्यपि ॥ ७ ॥
15 इनास्स्वात्माधिपार्काढ्या उष्णोऽग्नौ चतुरेऽपि च ।
उशिर्नाग्नावुशीरेऽस्त्री न नोपः कल्यसंध्ययोः ॥ ८ ॥
उस्रः किरण उस्रा गौरू ऋक्षंनिर्लोमनीन्द्रिये ।
कंब्वस्त्री वलये शंखे शंबूके कणसंख्ययोः ॥ ९ ॥
कल्को ना सिह्लके न स्त्री किट्टे दंभेऽघपिष्टयोः ।
20 कारा बन्धनगेहे स्त्री करे ना बन्धने न पण् ॥ १० ॥
कांस्यं कंसोऽस्त्रियां पानपात्रे तैजस आढके ।
काण्डोऽस्त्रीषौ बले नाले गर्ह्येऽवसरवर्गयोः ॥ ११ ॥

ग्रन्थौ स्तंबे प्रकाण्डेप्सु कश्यं मद्यकशार्हयोः ।
क्षुद्रो दरिद्रे कृपणे नृशंसेऽल्पनिकृष्टयोः ॥ १२ ॥
25 क्षुद्रा व्यङ्गा नटी वेश्या सरघा कण्टकारिका ।
कूटोऽस्त्री पुंजमायाघेष्वद्रिशृंगेषुभेदयोः ॥ १३ ॥
अयोघनेऽनृते फाले दंभे निश्चलयन्त्रके ।
कृष्णं सीसाघलोहेषु कृष्णो नीले नले कलौ ॥ १४ ॥
शूद्रे काके पिके व्यासे ध्वान्तपक्षेऽर्जुने हरौ ।
30 कोशोऽस्त्री कुड्मले दिव्ये शास्त्रेऽर्थौघे गृहे तनौ ॥ १५ ॥
गुह्येऽण्डे वेष्टके पेश्यां पुस्तकासिपिधानयोः ।
कोलं बदरतक्कोलशुण्ठीव्योषेऽर्धकर्षके ॥ १६ ॥
कोला चव्येऽस्त्रपिप्पल्योः कोलः स्वंजे प्लवे किटौ ।
कायो लक्ष्ये तनौ बृन्दे पुमांस्त्रिषु कदैवते ॥ १७ ॥
35 कर्पूरस्त्री तुषकोष्ठे कुल्यायां ना च ना करीषाग्नौ ।
श्रोण्यां भृशे किलिंजे गजगण्डे शवरथे शवे च कटः ॥ १८ ॥
किष्कुर्वितस्तावनपुं सप्रकोष्ठकरे पुमान् ।
कीलोऽस्त्री कफणौ ज्वाले बाहौ ना शंकुशर्वयोः ॥ १९ ॥
पीठे श्मश्रुणि कूर्चोऽस्त्री भ्रूमध्ये कत्थने कुशे ।
40 कृत्या क्रियादेवतयोः कार्ये क्ली कुपिते त्रिषु ॥ २० ॥
युगेऽक्षपाते पर्याप्ते कृतं क्ली विहितेऽर्थवत् ।
क्ष्वेडा वेणुशलाकायां सिंहनादे विषे तु ना ॥ २१ ॥
क्षेमो ना प्राप्तरक्षायां मोक्षेऽप्यस्त्री तु मङ्गले ।
स्वीयेऽन्तःकुक्षि कोष्ठोऽस्त्री कुसूलेऽन्तर्गृहे पदे ॥ २२ ॥
45 क्रोडं क्ली कर्ष उत्सङ्गे सूकरे ना न नोरसि ।
औषधे रुजि कुष्ठोऽस्त्री कुञ्जोऽस्त्री गह्वरे हनौ ॥ २३ ॥

दर्भे कुशोऽस्त्री तोये क्ली कुटिर्वक्रे गृहे नपणु ।
कृष्टिर्विलेखे प्राज्ञे ना खेटो ग्रामे कफेऽधमे ॥ २४ ॥
अर्धे गुडविकारे च खण्डोऽस्त्री खण्डिते त्रिषु ।
50 खलं भूस्थानकल्केषु खलो नीचः खलेत्वरी ॥ २५ ॥
गव्यूतौ गोगणे गव्या ज्यायागद्रव्ययोर्नेपुम् ।
भाण्डागारे पुमान् गञ्जस्त्री तु खन्यां सुरागृहे ॥ २६ ॥
गुडौ पिण्डेक्षुविकृती स्नुहीगुलिकयोर्गुडा ।
गुरुर्गीष्पतिपित्राद्योः पौरोहित्यकरे च ना ॥ २७ ॥
55 मात्रादौ स्त्री बृहत्ख्यातदुर्भगालघुषु त्रिषु ।
गोत्रा गोनिचये भूम्यां गोत्रं नाम्नि कुलेऽचले ॥ २८ ॥
गडुः पृष्ठगुडे कुब्जे गदो रोगो गदायुधम् ।
गोप्यो रक्ष्ये दाससुते घ्राणमाघ्राननासयोः ॥ २९ ॥
घनाः कठिनसंघातमेघकाठिन्यमुद्गराः ।
60 चित्रा सुभद्रा तारा च चित्रमालेख्यमिश्रयोः ॥ ३० ॥
चेलं वासोऽक्षमं काम्यं गर्हितं बर्हिचन्द्रकः ।
चुम्रो नाशे विषण्णे च चोक्षो गीतमनोज्ञयोः ॥ ३१ ॥
छेको विदग्धे गृह्ये च जिह्मं मन्देऽथवक्रयोः ।
जन्यं रणे जनिनरि विगीतजननीययोः ॥ ३२ ॥
65 ज्ञातिभृत्या नवोढाया जन्याः स्निग्धा वरस्य च ।
जीवः प्राणे त्रयी ना तु जन्तावात्मनि गीष्पतौ ॥ ३३ ॥
त्रिषु जीवति मौर्व्यां स्त्री स्याज्जीर्णो वजरद्वयोः ।
झषा नागबलायां स्त्री ना मत्स्ये मकरे वने ॥ ३४ ॥
तनुः स्त्री त्वचि देहे च त्रिष्वल्पे विरले कृशे ।
70 तमो राहुस्तमोऽघं शुक् स्वरूपेऽधस्तलोऽस्त्रियाम् ॥ ३५ ॥

क्ली तुल्यदेशे तारस्तु मुक्ताशुद्धौ सुमौक्तिके ।
उडुदृङ्मध्ययोरक्ली तुच्छं त्वसुखशून्ययोः ॥ ३६ ॥
ताम्रं शुल्बे शुल्बनिभे तिग्मास्तीक्ष्णोष्णभास्कराः ।
तीक्ष्णमुष्णे क्षुते युद्ध आत्मत्यजि विषेऽयसि ॥ ३७ ॥
75 कर्णमूलेऽभ्रहरितोस्तोक्मं तोक्मो हरिद्यवः ।
दंडोऽस्त्री शासने राज्ञां हिंसायां लगुडे दमे ॥ ३८ ॥
मिथ्याज्ञायां सैन्यभेदे दलो भागे दलं छदे ।
दरोऽस्त्री शंखभीगर्तेष्वल्पार्थे त्वव्ययं दरम् ॥ ३९ ॥
दंष्ट्री ग्राहे सदंष्ट्रेऽहौ शार्दूले मूषिके किटौ ।
80 परिमाणे दारुपात्रे द्रोणोऽस्त्री वायसे पुमान् ॥ ४० ॥
दिग्धो विषप्रलिप्तेषौ लिप्ते स्नेहप्रवृद्धयोः ।
दुर्गो राष्ट्रे वने दुर्गं दुर्गमे नरके पुरे ॥ ४१ ॥
दृश्या स्यात् पृतना दृश्यं दर्शनीये विभूषणे ।
धर्मोऽस्त्री सुकृते साम्ये स्वभावे ना तु सोमपे ॥ ४२ ॥
85 न्यायाचारयमाहिंसास्वस्त्री मेढ्रांकयोर्ध्वजः ।
धिष्ण्यौ शुक्रानलौ धिष्ण्यमृक्षे स्थाने बले गृहे ॥ ४३ ॥
ध्रुवो धात्रीशाकीलर्क्षनित्येषु स्त्री तु भूस्त्रुचोः ।
क्ली तर्के निश्चिते व्योम्नि धीरोऽब्धौ मंथरे बुधे ॥ ४४ ॥
निष्कोऽस्त्री हेम्नि दीनारे साष्टे कर्षशते पले ।
90 वक्षोविभूषणे कर्षे नाथस्त्विन्द्रे प्रभावपि ॥ ४५ ॥
न्युब्जं कुब्जे कर्मरंगे न्युब्जो व्याधावधोमुखे ।
नेमः पुरोहिते तुल्ये प्रस्थोऽस्त्री सानुमानयोः ॥ ४६ ॥
बंधने दूरमार्गे च प्राध्वं क्ली प्रवणे त्रिषु ।
पूर्वोऽर्थलिंगः प्राच्यादौ पूर्वजेषु नृभूमवान् ॥ ४७ ॥

95 पद्मोऽस्त्र्यब्जेऽष्टकायां स्त्री संख्यायां गजबिन्दुषु ।
ना तु नागे निधौ व्यूहे पंकोऽस्त्री कर्दमैनसोः ॥ ४८ ॥
परं दूरान्यमुख्येषु परोऽरिपरमात्मनोः ।
पार्ष्णिरुन्मत्तनार्यां स्त्री पादग्रंथेरधोऽपि च ॥ ४९ ॥
पुमांस्तु पूतनाकन्यां पापं स्यात् क्रूरपाप्मनोः ।
100 पुण्यं धर्मे जले हेम्नि पुष्पे स्त्री सुंदरेऽर्थवत् ॥ ५० ॥
पार्श्वमस्त्री समीपेऽपि पूज्यः श्वशुरमान्ययोः ।
स्नेहे केलौ प्रेम न स्त्री पीतिः पाने हये तु ना ॥ ५१ ॥
स्यात्परेत इव प्रेतो मृतप्राणिविशेषयोः ।
लाभनिष्पत्तिभोगेषु बीजे काले धने फलम् ॥ ५२ ॥
105 फली ताम्रादिफलके बर्हिर्नाग्नौ नपुं कुशे ।
ब्रह्मा रुद्रेंद्रभृग्वादिविप्रर्त्विग्यज्ञधातृषु ॥ ५३ ॥
अर्केऽग्नौ स्त्री तु वेदेऽन्ने स्वाध्यायात्मतपस्सु च ।
बलं रूपेऽस्थनि स्थौल्ये शक्तिरत्नश्रमेषु च ॥ ५४ ॥
बलो रामे बलाढ्ये च बाढं त्वनुमते दृढे ।
110 बिंबोऽस्त्री मण्डलसमप्रतिमामुखलक्ष्मसु ॥ ५५ ॥
प्रतिबिंबे तत्प्रकृतौ स्त्री तु स्याद्बिंबिकाफले ।
साज्ये मधुनि तक्कोले बोलं बोलोऽभसां भ्रमः ॥ ५६ ॥
बोधिरर्थे सुविज्ञाने कुक्कुटाश्वत्थयोस्तु ना ।
बालोऽस्त्री नीलझिण्ट्यां च भलौ तूद्रुपर्भास्करौ ॥ ५७ ॥
115 भगं योन्यां भगो यत्ने यशोवीर्यार्कभूतिषु ।
कान्तीच्छाज्ञानवैराग्यधर्मैश्वर्यतपस्सु च ॥ ५८ ॥
स्वादौ जन्तौ च भूतं स्त्री समानीतोचिते त्रिषु ।
भास्वानिंदौ भास्वरेऽर्के भेको वर्षाभ्वि कातरे ॥ ५९ ॥

अन्नतत्परयोर्भक्तं भद्रं कल्याणसौख्ययोः ।
120 मन्दास्सरोगनिर्भाग्यस्वल्पाज्ञापटुसूर्यजाः ॥ ६० ॥
क्षौद्रादौ तद्रसेऽप्यस्त्री ना वसन्ते रसेऽसुरे ।
चैत्रे मधूके क्ली त्वप्सु मद्ये पुष्परसे मधु ॥ ६१ ॥
अक्ली मणिरजाकण्ठस्तने रत्नेऽप्यलिंजरे ।
मात्रा परिच्छदेऽर्थेंशे प्रवृत्तौ कर्णभूषणे ॥ ६२ ॥
125 अक्षरावयवे माने मात्रं कात्स्न्र्येऽवधारणे ।
मध्यं युक्तेऽन्तराले च महद्राज्यविशालयोः ॥ ६३ ॥
मोचा कदल्यां स्त्री वृक्षरसे ना पाटले नषण् ।
मौलिस्संयतकेशेषु चूडायां मकुटेऽप्यषण् ॥ ६४ ॥
मलं किट्टाघयोश्चास्त्री यमजान्तकयोर्यमः ।
130 ययुर्ना मोक्षमार्गेऽश्वे स्त्रीत्वाप्तौ दीर्घयष्टिके ॥ ६५ ॥
युगोऽस्त्री स्यन्दनाद्यंगे क्ली तु युग्मे कृतादिके ।
योनिस्त्रीणां भगे स्थाने कारणे ताम्रकेऽप्यषण् ॥ ६६ ॥
योग्यं यन्त्वक्षमापूपयानोपायिषु चन्दने ।
योग्याभ्यासः क्षमापुण्ये रोको रश्मौ विले नपुम् ॥ ६७ ॥
135 राजते भूषणे रूप्यं रजते हेम्नि चाहते ।
त्रिषु प्रशस्तरूपेऽथ रणोऽस्त्री युधि ना ध्वनौ ॥ ६८ ॥
राष्ट्रोऽस्त्री विषये जन्तौ लोहोऽस्त्री तैजसायसोः ।
लक्षं नपुं शरव्ये ना स्त्री व्याजे नियुते न ना ॥ ६९ ॥
वर्णो नीलादिविप्राद्योः कीर्तौ गीतिक्रमे स्तुतौ ।
140 कुथे वृतेऽक्षरे त्वस्त्री प्रकारे लेपशोभयोः ॥ ७० ॥
वशा करिण्यां वन्ध्यायां रामायां दुहितर्यपि ।
वशो जनस्पृहायत्तेष्वायत्तत्वप्रभुत्वयोः ॥ ७१ ॥

वरो ना रूपजामात्रोर्देवादेर्गीप्सिते वृतौ ।
त्रिष्वग्र्ये स्त्री मनागिष्टे व्यक्तं स्पष्टे बुधे तु ना ॥ ७२ ॥
145 वत्सो ना कुटजे वर्षे तर्णके तनयादिके ।
बाले च वक्षसि त्वस्त्री वज्रोऽस्त्री हीरकास्त्रयोः ॥ ७३ ॥
व्याला दुष्टगजे सर्पे श्वापदे च पुमांस्त्रिषु ।
शठेऽथ वित्तमर्थे स्त्री त्रिषु ख्याते विचारिते ॥ ७४ ॥
वीतं शान्ते दुर्गजाश्वे वधो हिंसितृहिंसयोः ।
150 वार्ता वार्तिगणोदन्तवाणिज्यादिषु वर्तने ॥ ७५ ॥
निस्साराराोग्ययोष्षण्डो वृत्तिमन्त्रीरुजोस्त्रिषु ।
वृत्तं स्वरूपे चरिते वृत्तौ छन्दोविधासु च ॥ ७६ ॥
त्रिष्वतीतदृढाधीतवर्तुलेष्वथ गोप्यतौ ।
